Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

Center for Shaiva Studies, Pondicherry Collection

[illegible] by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

யுக நிர்ணயம்

2¼ 15-1- சைவ ஸாதகாதிகாரம்
படலாகரணம்
2

CSS

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta
Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

1/2·15

Tattva Prakasika
Tattva Sangraha
&
Tattvatraya Nirnaya

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

Center for Shaiva Studies, Pondicherry Collection

c.Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ श्रीः ॥

॥ शिवाभ्यां नमः ॥

तत्वप्रकाशिकातत्वसंग्रह-तत्वत्रयनिर्णयाः

सव्याख्याः ।

कृष्णतटाकाभिजनानां शास्त्ररत्नाकरादिबिरुदाङ्कितानां
श्रीकृष्णशास्त्रिणां अन्तेवासिना
शिवागमतत्वविदुषा
ना० कृष्णशास्त्रिणा ।

यथामति परिशोधिताः
देवसालपुरीशिवागमसिद्धान्तपरिपालनसङ्घाध्यक्षैः

श्रीरङ्गे श्रीवाणीविलासमुद्रणालये
मुद्रिताः ।
१९२१.

All Rights Reserved.

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

உ

சிவமயம்

வியாக்கியானத்துடன் கூடிய தத்துவப்பிரகாசிகை, தத்துவஸங்கிரஹம், தத்துவத்ரயநிர்ணயம்,

இவைகள்

சிவாகமசங்கவித்வான்

நா. கிருஷ்ணசாஸ்திரிகளால்,

பரிசோதிக்கப்பெற்று

தேவக்கோட்டை

சிவாகமசித்தாந்த பரிபாலன சங்கத்தாரால்

ஸ்ரீரங்கம் ஸ்ரீ வாணீ விலாஸ் பிரஸ்ஸில்

அச்சிடப்பெற்றன.

1923.

காப்பிரைட் ரிஜிஸ்டர்ட்

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ विज्ञप्तिः ॥

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ॥

यः कामिकादिविनिवेदिततत्त्वरूप-
स्तत्त्ववेदिपशुपाशविमोचको यः ।
नारयणीभुजलताञ्चितकण्ठदेशो
भक्तिं स मे दिशतु नैजपदारविन्दे ॥

श्रीकण्ठाप्पयदीक्षितैर्मुनिवरैः श्रीसूतपौराणिकै-
र्विद्यारण्यमहायतिप्रभृतिभिस्तोष्टूयमानाः सदा ।
श्रीमत्कामिकमुख्यशैवनिगमाः श्रीशिवपूजापराः
लोकेऽस्मिन् विलसन्ति वेदवचसा तुल्यप्रमाणाः शुभाः॥

यावद्वेदाः प्रकाशन्ते तावच्छैवागमा अपि ।
आगमा निगमा एव तयोर्भेदोऽस्ति न क्वचित् ॥

भोः भोः पण्डितप्रकाण्डाः ! शिवभक्ताग्रेसराः ! शिव-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

दीक्षासमालब्धदिव्यशैवमहिमानो महान्तः! आस्तिकवर्या ! किंचिदिव कर्णे कुरुतेमं मदीयं विज्ञप्तिलेशं। यत्किल विदितमेवेदं तत्रभवतां ऊर्ध्वस्रोतोमुखत्वेन वेदवत्प्रमाणभूतकामिकाद्यष्टाविंशत्यागमेषु उपागमेषु च प्रत्येकं विद्यायोगचर्याक्रियापदभाज चत्वारः पादाः समुल्लसन्तितराम्। तेषां च विरल प्रचारत्वादतिगूढार्थत्वाच्च तेभ्य एवाऽर्थपरिज्ञानमस्मदादीनां अशक्यमिति परशिवावतारभूतैः कैश्चिन्महात्मभिः सुस्पष्टार्थप्रतिपादका बहवो वृत्तयः कृताः। तेषु च विद्यापादपदार्थपरिजिज्ञासूनां सुखबोधार्थमादरात्केचन परमेश्वरतत्त्वाऽवबोधनः पण्डितप्रकाण्डाः शिवसृष्टाः सन्तानाचार्याः शिवागमतत्त्वार्थान् कारिकारूपेण प्रकरणाष्टकेन प्रकटीकृतवन्त इति। तदेवाद्याप्यष्टप्रकरणमिति सुप्रसिद्धरूपधेयेन प्रसिद्धतमम्। तानि च प्रकरणानि, 'तत्वप्रकाशिका, तत्वसंग्रहः तत्वत्रयम्, भोगकारिका, नादकारिका, मोक्षकारिका, परमोक्षनिरासकारिका, रत्नत्रय, समाख्यानि। एतानि च सव्याख्यानानि शैवसिद्धान्ततत्त्वार्थप्रतिपादकान्यपि एतावदन्तं कलिकालकालुष्यादधिकारिणामश्रद्धया च तालपत्रेष्वेव कचित्कलुषभावं प्राप्तानि स्वसम्बन्धितालपत्रैरेव स्वेषामतिप्राचीनकालिकतां निवेदयन्ति स्थितानीति च मत्वा करुणाद्रर्या दृष्ट्या दृष्ट्वा च देवसालपुरवास्तव्याःशिव

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भक्त्यधीना शिवालय जीर्णोद्धारण शिवलिङ्गप्रतिष्ठादि महत्कार्य-
धुरंधराः सुकृतिनो वैश्यवर्याः शिवालयजीर्णोद्धारणलिङ्ग-
प्रतिष्ठादिकर्मसाधनानि शिवागमान्येवेति मत्वा तन्मुद्रण-
प्रकटनादिरूपमेव तदुद्धारणं पूर्वकर्मेति मनसि संदधाना-
स्तद्विषयं बहूनि धनानि निधित्वेन परिकल्प्य स्वतस्स-
द्धागमपोषककार्यधुर्यागमार्जकांगत्वादिपदभाजः कंचन
कल्पयामासुस्स्वतस्सिद्धयथार्थनामानं शिवागमसिद्धान्तप-
रिपालनसंघम्। तस्मिंश्च चिरकालादारभ्य बहूनि शैवसं-
बन्धीनि कार्याणि प्रचलन्ति स्म, तेषु च शिवांशावतारभूत
श्रीमदप्पयदीक्षित कृता शिवार्चनाचन्द्रिका मुद्रिता वि-
जयेतराम्। संप्रति च अष्टप्रकरणेषु प्रकरणत्रयं सम्मुद्र्यै-
कपुस्तकरूपेण प्रकाशितम्। इतराण्यपि प्रकरणानि मुद्र-
णावस्थायां वर्तन्ते तान्यप्यचिरादेव प्रकटीक्रियन्ते। तथा-
भट्टरामकण्ठकृतवृत्तिसहितमतङ्गपारमेश्वरविद्यापादः, मतङ्ग-
पारमेश्वरं मूलागमस्समग्रः, तथा किरणागमस्समग्र, श्री-
मन्मृगेन्द्रे विद्यापाद, तद्वृत्तिः तद्दीपिका च, तथा अघोरशि-
वाचार्यकृता, क्रियाक्रमद्योतिका अतिविशुद्धानिर्मलमणिकृत-
प्रभाख्यव्याख्यया सहिता, लिङ्गोद्धारकृतभाष्यसहिता, शिव-
सहस्रनामावलिः। एतानि ग्रन्थरत्नानि च अचिरादेव
मुद्रयिष्यन्ते इति, शम्।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

तत्त्वप्रकाशिका तावदपूर्वा अष्टप्रकरणान्तर्गता आर्यावृत्त-मिलितपञ्चसप्ततिपद्यमयी। अस्यां च शिवागमविद्यापादप्रतिपाद्यानि, षट्त्रिंशत्तत्वानि सुविशदं निरूपितानि ॥

एतत्प्रकरणकर्ता **श्रीभोजदेवनृपतिः** अयं च कः कदा-वासीदिति सुविशदं न ज्ञायते। परं तु श्रीमदघोरशिवाचार्यकृतपद्धत्यामुत्सवविधौ गोत्रविधिनिर्णयपटले 'ततोऽभूल्लाट-उत्तुङ्गशिवो विन्ध्ये व्रतीश्वरः। कल्याणनगरीवासी गुरुः पद्धतिकृत्सुधीः।' 'सर्वविद्याधिपो यस्य कनीयानार्यदेशजः। सर्वागमार्थनिर्णेतुः श्रीभोजनृपतेर्गुरुः॥' इति पद्यद्वयाभ्यां अस्य भोजदेवनृपतेर्गुरवः उत्तुङ्गशिवाचार्याः। यैश्च कृता पद्धतिरपि काचन उत्तुङ्गशिवाचार्यपद्धतिरिति तन्नामाङ्किताऽप्रसिद्धाऽमुद्रिता वर्तते। सर्वागमार्थनिर्णेतुरिति विशेषणेनास्यागमेष्वप्रतिहतपाण्डित्यमप्यस्ति' इति निश्चीयते। अन्यच्च सूतसंहिताव्याख्याने विद्यारण्ययतीन्द्रैः तत्र तत्र एतत्प्रकरणगताश्श्लोकाः प्रमाणीक्रियन्ते। एतच्च ग्रन्थरत्नं **कुमारदेव**विरचितव्याख्यासहितं अनन्तशयनस्थराजकीयमुद्रणालये मुद्रितं वर्तते। स च **कुमारदेवः** तत्र तत्र शिवागमसङ्ग्रहभूतासु पद्धतिषु तदुक्तं 'कुमारदेवेन' इति प्रामाणिकत्वेन परिगृहीतः।

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तत्त्वसंग्रहोऽप्यष्टप्रकरणान्तर्गत एव अस्य च प्रणेतारः सद्योज्योतिरिति प्रसिद्धाश्शिवाचार्यवर्याः। यैश्च कृता सुवृत्तिरिति प्रसिद्धा रौरवागमीयवृत्तिः। एतच्चैतत्प्रकरणा-ऽन्तिमेन 'इत्यवदत्तत्वानि तु सद्योज्योतिस्सुवृत्तिकृत्' इति पद्येनैव सुस्पष्टं विज्ञायते। तत्पद्यव्याख्याने अघोरशिवाचार्यैः सुवृत्तिस्सद्वृत्तिरिति च रौरववृत्तेर्नामेति व्याख्यातं सुवृत्तिपदम्। एतेषां चावतारकालादिकं न सुस्पष्टतया ज्ञायते। अस्मिंश्च प्रकरणे 'व्युत्क्रमेणापनेयोऽसौ शिवाय गमनं प्रति' इति श्रीमत्स्वायंभुवश्रुत्यनुरोधेन दीक्षायां संहारक्रमेणैव षट्-त्रिंशत्तत्त्वानां शुद्धेः सद्भावेन च संहारक्रमेणैव पृथिव्यादि-शिवान्तानि षट्त्रिंशत्तत्त्वानि प्रतिपादितानि। अस्य च तत्त्वसंग्रहस्य भट्टनारायणकण्ठविरचिताऽमुद्रिता, अति-विस्तृता, काचन टीकाऽपि वर्तते। यस्य च पुत्रः भट्टराम-कण्ठ श्रीमत्कपरमेश्वरीयवृत्तिमकरोत्। अस्या अतिविस्तृत-त्वादेव श्रीमदघोरशिवाचार्यैः लघुटीकेति सार्थकनामालंकृता टीका कृता। यया च टीकया समलंकृतोऽयं संमुद्य विजय-तेतराम्। तदुक्तं श्रीमदघोरशिवाचार्यैः। एतद्व्याख्याना-वतरणिकायां 'तत्त्वसंग्रहचन्द्रस्य प्रकाशाय वितानिता। श्रीनारायणकण्ठेन बृहट्टीका शरन्निशा' तथापि खिन्नबुद्धीनां बृहट्टीकाप्रविस्तरे। हिताय लघुटीकाऽत्र मयेयमुपरच्यते इति।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

तत्त्वत्रयमिदं प्रकरणरत्नमपि अष्टप्रकरणान्तर्गतमेव। अस्याऽपि प्रणेतारः सद्योज्योतिःशिवाचार्या एव। ते च रौरवागमसिद्धमर्थं तत्त्वसंग्रहाख्येन प्रकरणरत्नेन प्रतिपाद्य स्वायंभुवागमसिद्धमर्थमनेन प्रकटीकृतवान्। तदुक्तमेतत्प्रकरणावसाने शिवाचार्यैरेव 'उक्तसमासतोऽयं तत्त्वत्रयनिर्णयश्च वृत्तिकृता। स्वायंभुवस्य जडतामपनेतुमनादिकां पुंस्यः' इत्यनेनैव परिज्ञायते।

अस्मिंश्च प्रकरणे पतिपशुपाशाख्यानि त्रीणि तत्त्वानि प्रतिपादितानि। इति शम्।

एतेषामष्टप्रकरणानां व्याख्यातारः श्रीमदघोरशिवाचार्याः॥

एते च सकलवेदशिवागमचतुस्तन्त्रपारङ्गता इत्येतत्तदीयग्रन्थावलोकनतत्पराणां सर्वेषामपि हस्तामलकवत्प्रकाशेत। एतेषां चावतारकालादिकं न सम्यक्तया निश्चेतुं शक्यते। परंत्वेभिरेव स्वकृतपद्धत्यामुत्सवप्रकरणे गोत्रसन्ततिनिर्णयसंक्षेपतः परमशिवात्प्रभृति सन्तानक्रमेण स्वसन्ततीयानुक्त्वा अवसाने 'सिद्धान्तसारपद्धत्यां सोपदेशमनुष्ठितम्। सर्वात्मशिवपादेभ्यो ह्यरत्नगुरुवरान्मया॥' 'नादक्षेये शकस्याब्दे वर्तमाने कलौ युगे। ग्रन्थतः सप्तसहस्रैश्च संयुक्ता पञ्चभिश्शतैः। इत्यादिना, तथा तत्त्वत्रयविवरणेऽन्तमश्लोके

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीमद्घोरशिवाह्वयेन गुरुणा श्रीजन्यया व्याख्यया लोकेऽपि प्रथितेन कुण्डिनकुले चोळस्वलङ्कुर्वता । श्रीमत्सर्वात्मशिवा प्रप्रादरजमामाराधकेनाऽपल रत्नत्रयनिर्णयस्य विवृतिर्लैंगादियं निर्मिता । इत्यनेन च स्वस्य गुरवः सर्वात्मशिवाऽऽचार्याः, स्वस्य वासस्थानं चोळदेश, कलौ, शालिवाहनशकाब्दे, अशीत्युत्तरसहस्र, स्वेन कृतेयं पद्धतिरिति च स्पष्टं प्रकटीकृतम् । तस्मात् सप्ताधिकसप्तशतवर्षेभ्यः प्राक् एतेषां स्थितिकाल इति निश्चीयते एतच्च ज्यौतिषिकानां कटपयादिसंख्यामनुसृत्योक्तम् ।

एतेषां शिवाचार्याणां लक्षद्वयाध्यापक इति सुमहती प्रशस्तिरपि काचन वर्तते । शिवागमानां सर्वेषामप्येभिरेव वृत्तयः प्रायशः कृताः ॥

सव्याख्यस्याऽस्यास्य प्रकरणस्य संशोधनाऽऽधारभूतास्तु ग्रन्था एते । कीवलूरमहाग्राऽग्रजैः कल्याणसुन्दरशिवाचार्यैः उपकृतः एकस्तालपत्रात्मकः प्रायशः परिष्कृतः । मायूरपुरीविराजमानाऽऽगमपाठशालाऽध्यापक वैद्यनाथशिवाचार्यैः उपकृतः कश्चन काकलपत्रात्मकः, तथा प्रकरणाष्टकमध्ये द्वित्राणां प्रकरणानां मधुरान्तकं सुब्रह्मण्यशिवाचार्याः, तथा भानुपुराधीन मुत्तुकुमारदीक्षितवर्याश्चोपकृतवन्तः । पुस्तकदातॄणां प्रत्युपकारविषये भक्तिपूर्वकाण्यन-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

न्तानि नमांसि समर्पयन्त्येतन्मुद्रणकर्तारः शिवागमसङ्घा-ध्यक्षाः ।

इत्थं,

शिवागमसङ्घाध्यक्षाः ।

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ श्रीः ॥

शिवाभ्यां नमः ॥

॥ तत्वप्रकाशिका ॥

(अघोरशिवाचार्यकृत वृत्तिसहिता)

शिवं प्रणम्य षट्त्रिंशत्तत्त्वातीतं सशक्तिकम् ।
व्याख्यां तत्त्वप्रकाशस्य स्फुटां लघ्वीं करोम्यहम् ॥
अद्वैतवासनाविष्टैः सिद्धान्तज्ञानवर्जितैः ।
व्याख्यातोऽत्रान्यथाऽन्यैर्यत्सततोऽस्माकमुद्यमः ॥

तत्र तावदाचार्यः प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्त्यर्थं सिद्धान्तशास्त्रप्रवृत्तिनिमित्तं सकलतत्त्वातीतं निष्कलं परमशिवमाद्ययाऽऽर्यया स्तौति—

चिद्घन एको व्यापी
नित्यः सततोदितः प्रभुश्शान्तः ।

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

जयति जगदेकबीजं
सर्वानुग्राहकश्शंभुः ॥ १ ॥

चिच्छब्देनात्र ज्ञानक्रिये वक्ष्येते । तदुक्तं श्रीमन्मृगेन्द्रे— 'चैतन्यं दृक्क्रियारूप' मिति । चिदेव घनं देहः यस्य सः चिद्घनः । न तु कर्मकालादीश्वरवादिनामिव जडः । अचेतनस्य चेतनाधिष्ठानं विना प्रवृत्त्ययोगात् । न चास्य बैन्दवशरीराद्युपगमो युक्तः । अनीश्वरत्वप्रसङ्गात् । तस्य च कर्त्रन्तरापेक्षायां स्वकर्तृकत्वेऽन्यकर्तृकत्वे वाऽनवस्थाप्रसङ्गाच्च । एकः अद्वितीयः । न त्वनेकेश्वरपक्षोऽपि युक्तः । रथादीनामप्यनेककर्तृकाणामेकेच्छानुवर्तनं विनाऽनुत्पत्तेः । यदुक्तम्—'बहवो यत्र नेतारस्सर्वे पण्डितमानिनः । तथा महत्त्वमिच्छन्ति तद्वृन्दमवसीदति'॥ अनेन प्रवाहेश्वरपक्षोऽपि निरस्तः । ऐश्वर्यस्य स्वरूपव्यक्तिलाभात्मकत्वेन विनाशानुपपत्तेः । व्यापी सर्वगतः । न तु क्षपणकादीनामिव शरीरपरिमितः, सङ्कोचविकासधर्मी वा । तादृशस्याऽचेतनत्वानित्यत्वादिदोषप्रसङ्गात् । नित्यः आद्यन्तरहितः । न तु बौद्धानामिव क्षणिकः । उत्पत्तिकाल एव नश्यतस्तस्य जगत्कर्तृकत्वासंभवात् । ननु मुक्तात्मानोऽप्येवंभूता एवात आह—सततोदितः नित्यमुक्तः । न तु मुक्तात्मान इवेश्व-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

रांतरप्रसादमुक्तः । अनवस्थाप्रसङ्गात् । प्रभुः प्रभवनशीलः । नत्वीश्वरान्तरप्रेर्य इत्यर्थः । प्रागुक्तादेव हेतोः । नान्यकर्ता । जगत्कर्तृत्वेनैवास्य सिद्धेः (शान्तः रागद्वेषादिरहितः । मोहो मदश्च रागश्च विषादश्शोष एव च । वैचित्र्यं चैव हर्षश्च सप्तैते सहजामलाः ।। तत्कारणस्य मलादेरसंभवात् । किं पुनरेवंभूतस्येश्वरस्य सद्भावे प्रमाणमिति चेदत आह—

जगदेकबीजमिति । जगतः निमित्तकर्ता । अयमभिप्रायः— सन्निवेशादिमत्वेन जगतः कार्यत्वं बुद्ध्वा तस्य निमित्तं कारणमीश्वराख्यं कार्यत्वेन हेतुनाऽनुमीयते । यद्यत्सावयवं तत्तत्कार्यं, यद्यत्कार्यं तत्सकर्तृकमिति न्यायात् । यच्छ्रूयते—

'विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम् । कार्यत्वादावयोस्सिद्धं कार्यं कुंभादिकं यथे'ति ॥ श्रीमन्मतङ्गेऽपि—

'निमित्तकारणं त्वीश' इति ॥ अयं चेश्वरवादोऽस्माभिः मृगेन्द्रवृत्तिदीपिकायामुक्तः तत एवावधार्यः । **सर्वानुग्राहकः**— अनुग्रहश्चात्रोपलक्षणं सृष्ट्यादेरपि । अतश्च सृष्टिस्थितिसंहारतिरोभावानुग्रहाख्यैः पञ्चभिः कृत्यैस्सर्वेषामात्मनां भोगमोक्षप्रद इत्यर्थः । सर्वकर्तृत्वादेव चास्य सर्वज्ञत्वं सिद्धम् । अज्ञातस्य करणासंभवात् । उक्तं च—

'सर्वज्ञस्सर्वकर्तृत्वात् साधनाङ्गफलैस्सह । यो यज्जानाति

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

कुरुते स तदेवेति सुस्थितम्' इति ॥ एवंभूतश्शंभुः परमेश्वरो जयति सर्वोत्कर्षेण वर्तते प्रोक्तैरेव हेतुभिरिति ॥ १ ॥

एवं धर्मिस्वरूपं शिवं प्रस्तुत्य धर्मस्वरूपस्य तत्सामर्थ्यस्य त्रयावस्थां स्तुतिव्याजेन दर्शयति—

नोदयति यन्न नश्यति
निर्वाति न निर्वृतिं प्रयच्छति च ।
ज्ञानक्रियास्वभावं
तत्तेजः शांभवं जयति ॥ २ ॥

उत्पत्तिविनाशशून्यमित्यनेन तद्योगिनो बौद्धज्ञानाद्वैतन्यात्मनश्शिवतेजसो विशेषं दर्शयति ॥ यद्येवं 'चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा' इति श्रुतेः आत्मसामर्थ्याच्छिवसामर्थ्यस्य को विशेष इत्यत आह—**निर्वाति न निर्वृतिं प्रयच्छतीति**। अयमस्य पशुसामर्थ्याद्विशेषो दर्शितः। यदिदं केनापि न मुच्यते तत्त्वनेन पाशविमोचनेन प्रकटीक्रियत इति। किं तत इत्यत आह— '**ज्ञानक्रियास्वभावं तत्तेजश्शांभवं जयति**' इति चिद्धर्मत्वादेवेदमपि चिदात्मकमित्यर्थः। यच्छ्रूयते 'शक्तिर्नाचेतना चित' इति ॥ २॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इदानीं अधिकारावस्थायामपि शिवस्य शक्तिरेव करण-मित्याह--

शक्तौ यया स शंभुः
भुक्तौ मुक्तौ च पशुगणस्यास्य ।
तामेकां चिद्रूपा-
माद्यां सर्वात्मनाऽस्मि नतः ॥ ३ ॥

शक्त्यात्मनैव करणेनात्मनां भोगमोक्षसिद्धये शिवः पञ्चविधकृत्यकरणे शक्तस्समर्थो भवति ॥ न तद्व्यतिरिक्तेन करणान्तरेण । ननु देहेन्द्रियरहितस्य कर्तृत्वं न दृश्यते इति चेन्न । तद्रहितस्यात्मनश्शक्तिमात्रादेव स्वदेहस्पन्दादौ सामर्थ्यदर्शनात् । उक्तञ्च—'करणन्तु न शक्त्यन्यत्' इति । एकामित्यनेनास्या इच्छादिभेदो वामादिभेदश्च ज्ञेय-कार्याद्युपाधिभेदेनोपचारान्न तु परमार्थत इति दर्शयति 'ए-कैवानेकतां याति शिवशक्तिरुपाधित' इति श्रुतेः ॥ चिद्रू-पामित्यनेन कार्यभेदेऽपि मायादिवन्नास्याः परिणाम इति दर्शयति तस्य जडधर्मत्वात् । आद्यां प्रधानभूताम् । समवे-ताम् । अनेन परिग्रहशक्तिस्वरूपं बिन्दुमायात्मकमप्यस्य बाह्यं शक्तिद्वयमस्तीति सूचयति । उपादानं विना जगदु-त्पत्त्ययोगात् । वक्ष्यति चात्र--कर्त्रा विना न कार्यं न

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तथोपादानकरणाभ्याम्' इति ॥ ३ ॥

अधुना प्रकरणे प्रतिपाद्यमर्थं प्रतिजानीते—

लोकानुग्रहहेतोः
करुणारसनिर्भरेण चित्तेन ।
तत्त्वप्रकाश एषो-
ऽस्माभिः क्रियते समासेन ॥ ४ ॥

तत्त्वानां पृथिव्यादिशिवान्ततत्त्वानां तत्कर्तुश्शिवस्य तद्बद्धकार्याणां चात्मनां प्रकाशः क्रियत इत्यर्थः ॥ ४ ॥

तान्येव प्रकाशान्युद्दिशति—

शैवागमेषु मुख्यं
पतिपशुपाशा इति क्रमात्त्रितयम् ॥
तत्र पतिः शिव उक्तः
पशवो ह्यणवोऽर्थपञ्चकं पाशाः ॥ ५ ॥

पदार्थानामिति शेषः । तदुक्तं तन्त्रलक्षणे— 'त्रिपदार्थं चतुष्पादं महातन्त्रम्' इति ॥ अतश्च तेष्वेवान्येषां वस्तुनामन्तर्भाव इति स लक्षणेन दर्शयति—तत्र पतिरिति । तत्र तेषु त्रिपदार्थेषु मध्ये पतिपदार्थश्शिव इत्युक्तः । शिवशब्देनात्र

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

जात्येकवचनेन शिवत्वयोगिनां मन्त्रमन्त्रेश्वरमन्त्रमहेश्वर-मुक्तात्मशक्तिशिवानां सवाचकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पतिपदार्थे सङ्ग्रहः कथ्यते। अणवश्चात्मानः प्रेर्याः। अनेन च पशुत्वयोगिनां विज्ञान-कलादिभेदभिन्नानां बद्धात्मनां पशुपदार्थत्वमुच्यते। अर्थ-पञ्चकमित्यनेन मलरोधशक्तिकर्ममायाबिन्दवः प्रोच्यन्ते। ततस्तेषां पञ्चानां बिन्दुमायोद्भूतैश्शुद्धाशुद्धरूपैस्तत्त्वभुवनभूत-भावैः सह पाशपदार्थे सङ्ग्रहः। ननु कथमेकस्या एव शिवशक्तेः पतिपदार्थे पाशपदार्थे च सङ्ग्रह उच्यते। सत्यम्। परमा-र्थतः पतिपदार्थ एव शक्तेरन्तर्भावः। पाशत्वं तु तस्याः पाशधर्मानुवर्तनेनोपचारात्। तदुक्तं श्रीमन्मृगेन्द्रे—'तासां माहेश्वरीशक्तिः सर्वानुग्राहिका शिवा। धर्मानुवर्तनादेव पाश इत्युपचर्यते' इति॥ ५॥

अस्तु तर्हि मुक्तानां पाशसंसर्गरहितत्वाच्छिवत्वम्। विद्येश्वरादीनां तु बैन्दवशरीरयोगेऽपि कथं पशुत्वा-भावोऽत आह—

मुक्तात्मानोऽपि शिवाः
किन्त्वेतेतत्प्रसादतो मुक्ताः।
सोऽनादि मुक्त एको
विज्ञेयः पञ्चमन्त्रतनुः॥ ६॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

मुक्तात्मानः संप्राप्तशिवसाम्याः । अपिशब्दाद्विद्येश्वरादयश्च शिवा एव । पशुत्वाख्येन मलेन विरहात् । तद्योगिनां हि पशुत्वम् । 'पशुः पशुत्वसंयोगात्' इति श्रुतेः । अत एषां शिवत्वेन सर्वज्ञत्वादिना योगात् शिवत्वमेव । बैन्दवशरीरयोगस्तु अधिकारमलांशावशेषतोऽधिकारनिबन्धन एव । अत एव । मायोत्तीर्णत्वान्मलरहितत्वाच्च । विद्याविद्येश्वरप्राप्तेरपरमुक्तित्वम् । कथं पुनर्मन्त्रेश्वराणां कलादियोगेऽपि शिवत्वम् । साक्षाच्छिवानुगृहीतत्वेन सर्वज्ञत्वादिनायोगान्मलरहितत्वाच्च । कलादीनां योगस्तु मायागर्भाधिकारमलांशावशेषतोऽधिकारनिबन्धनत्वेन । तेषामावश्यकत्वाच्च । यदुक्तम्—'कलायोगेऽपि नो वश्याः खलानां पशुसङ्घवत्' इति । यद्येवं शिवत्वे समानेऽपि मुक्तात्मादिभ्योऽस्य परमेश्वरस्य को विशेषोऽत आह— '**किन्त्वेते तत्प्रसादतो मुक्ताः**' इति । एते पूर्वोक्ताः विद्येश्वरादयः तस्य परमेश्वरस्य प्रसादतः । **सोऽनादिमुक्त** इति । अनादिमुक्तः = स्वभावसिद्धनित्यनिर्मलनिरतिशयार्थज्ञानक्रियाशक्तियुक्त इत्यर्थः । ननु ईश्वरस्यापि 'पञ्चवक्त्रः त्रिपञ्चदृक्' इत्यादिनाऽऽगमेषु शरीरेन्द्रिययोगः श्रूयत इत्यत आह— **पञ्चमन्त्रतनुः** । अयमभिप्रायः—ध्यानार्थमेवेश्वरस्य पञ्चवक्त्राद्याकारः श्रूयते निराकारे ध्यानपूजाद्ययोगात् । यदाहुः— 'आकारवांस्त्वं

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

नियमादुपास्यो न वस्त्वनाकारमुपैति बुद्धिः' इति । श्रीमत्पौष्करेऽपि—'साधकस्य तु लक्ष्यार्थं तस्य रूपमुदाहृतम्' इति । श्रीमन्मृगेन्द्रेऽपि 'वपुषो विद्यमानत्वाद्यत्कृत्यं करोति सः । तत्र तत्रास्यं तत्कर्तृवपुषाऽनुकृतं वपुः' इति ॥ अतः पञ्चमन्त्रात्मिकाः पञ्चकृत्योपयोगिन्यः ईशानाद्याः शक्तय एव शरीरकार्यं कुर्वाणाः तनुरित्युपचारादुच्यन्ते । तदुक्तम्—'तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः । ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकम्' इति ॥ ६ ॥

अत एवाह—

पञ्चविधं तत्कृत्यं
सृष्टिस्थितिसंहृतितिरोभावाः ।
तद्वदनुग्रहकरणं
प्रोक्तं सततोदितस्यास्य ॥ ७ ॥

एतत्कृत्यपञ्चकं शुद्धाध्वविषये साक्षाच्छिवकर्तृकम् । अशुद्धाध्वविषये त्वनन्तादिद्वारेणेत्युक्तम् । तथा श्रीमत्किरणे—'शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः' इति । तत्र शिवस्य साक्षात्सृष्टिर्बिन्द्वात्मकादुपादानाच्छुद्धतत्त्वभुवनाद्युत्पादनपूर्वकं तद्भुवनवासिनां विद्याविद्येश्वराणाञ्च बैन्दवशरीरयोजनम् । नादादिक्रमेण विद्योत्पादनं च । अन-

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

न्तादिद्वारा तु मायाद्युपादानादशुद्धतत्त्वभुवनाद्युत्पादनपूर्वकं पशुसङ्घानां सूक्ष्मेण तात्त्विकशरीरेण स्वकर्मानुगुणभौवनशरीरेण च योजनम्। मन्त्रेश्वराणामधिकारनिबन्धनशरीरोत्पादनं च। **स्थितिः** स्वशक्त्या निरुद्धस्य सर्वस्य जगतः स्वविषयेऽवस्थापनम्। **संहृतिस्तु** शुद्धाशुद्धयोः कार्यवर्गयोर्बिन्दुमाययोरुपसंहारः। **तिरोभावश्च** पाशानुग्रहणेनात्मनां यथानुगुणभोगभोजनम्। **अनुग्रहोऽपि** पाशतिरोधानेनात्मनां परापरमोक्षदानमिति। ननु 'सृष्टिसंरक्षणादानभावानुग्रहकारिण' इति श्रीमद्रौरवादि श्रुतेः विद्याविद्येशानामपि पञ्चकृत्याधिकारित्वात्कथं सततोदितस्यास्येति नियमः? । उच्यते—तेषामपि शिवप्रेरणयैव पञ्चविधकृत्यकर्तृत्वात्तथोक्तमित्याविरोधः ॥ ७ ॥

इत्थं पतिपदार्थभेदमुक्त्वा पशुपदार्थभेदमाह—

पशवस्त्रिविधा ज्ञेयाः
विज्ञानप्रळयकेवलौ सकलः।
मलयुक्तस्तत्राद्यो
मलकर्मयुतो द्वितीयः स्यात्॥ ८ ॥

तत्रेति। तेषां मध्ये आद्यः विज्ञानकेवलाख्यो वर्गः। 'विज्ञानयोगसन्यासैर्भोगाद्वा कर्मणः क्षयात्' इति कर्म-

Center for Shaiva Studies, Pondicherry Collection

lic Domain, Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

क्षयतः । कर्मभोगार्थस्य कलादिबन्धस्याप्यभावात् केवलं मलमात्रयुक्तः स्यात् । द्वितीयस्तु प्रलयकेवलाख्यो वर्गः प्रलये कलादेरुपसंहारात् मलकर्मयुक्तो भवति ॥ ८ ॥

मलमायाकर्मयुतः
सकलस्तेषु द्विधा भवेदाद्यः ।
आद्यः समाप्तकलुषो-
ऽसमाप्तकलुषो द्वितीयः स्यात् ॥ ९ ॥

सकलस्तु बन्धत्रययुक्तः । तत्र च मायायाः साक्षात्संबन्धाभावात् मायाशब्देन तत्कार्यभूताः कलादयः कथ्यन्ते । तद्युक्तत्वादेव चास्य सकलत्वम् । अतश्च विज्ञानादिना कर्मक्षयेऽपि किञ्चित्कालं संस्कारवशेन शरीरस्थितिः संभवतीति मलमायायुक्तेऽपि सकलभेदः शास्त्रेषु श्रूयते । उक्तं च सांख्यैः— 'सम्यक् ज्ञानाधिगमाद्धर्मादीनामकरणप्राप्तौ । तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः' इति ॥ किं च । तेष्विवेति आद्यो विज्ञानकेवलः पुनर्द्विधा—अभिद्यते । कौ तौ भेदावित्यत आह । आद्य इति । मलस्य द्रव्यत्वे सति जडत्वाच्चक्षुषः पटलादेरिव पाकस्संभवतीति । आद्यो विज्ञानकेवलः पक्वमलापक्वमलभेदेन द्विविधो भवतीति भावः ॥९॥

तयोस्तु—

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

आद्याननुगृह्य शिवो
विद्येशत्वे नियोजयत्यष्टौ ।
मन्त्रांश्च करोत्यपरान्
ते चोक्ताः कोटयः सप्त ॥ १० ॥

आद्यान् पक्वमलान् पाकतारतम्यापेक्षयाऽधिकारयोग्या **ननु गृह्य**मलापोहनेन सर्वज्ञत्वादिनायुक्तान् । बैन्दवशरीरयोगिनश्च कृत्वा । तेषु विशिष्टमलपाकवतोऽष्टौ विद्येशत्वे योजयति । अनन्त सूक्ष्म शिवोत्तम एकनेत्र एकरुद्र त्रिमूर्ति श्रीकण्ठ शिखण्डिसंज्ञान् पञ्चकृत्याधिकारिणः शुद्धाद्ध्वाधिष्ठातॄनीश्वरतत्वनिवासिनश्च करोतीत्यर्थः । **अपरांस्तु सप्त**कोटिसंख्यातान् **मन्त्रा**ननुग्रहकारणभूतान् विद्यातत्वनिवासिनश्च करोतीत्यर्थः । तेषु चार्धं सकलविषये गुर्वधिकरणस्य शिवस्यानुग्रहकर्मणि करणत्वेन स्थित्वा महाप्रलये मोक्षं याति । अन्यत्त्वर्धं निरधिकरणस्य शिवस्य विज्ञानकलादिविषये मन्त्रेश्वरमायागर्भाधिकारिविषये च करणत्वं प्राप्याधिकारवैराग्यात् सृष्ट्यनन्तरमेवापावृत्तं भवति । तदुक्तं श्रीमन्मृगेन्द्रे— प्रयोक्तृदेहसापेक्षं तदर्धमखिलेऽध्वनि । कृत्स्वाधिकारं स्थित्यन्ते शिवं विशति सेश्वरम् । विनाऽधिकरणेनान्यत्प्रधानविकृते रधः । कृत्वाऽधिकारमीशष्टमुपैति स्वा-

Center for Shaiva Studies, Pondicherry Collection

lic Domain, Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ङ्कसंहृतौ' इति ॥ येत्वत्रात्यन्तमलपाकवन्तोऽधिकारानपेक्षास्तान्परे पदे योजयति। ये त्वपक्कमलास्तेषां मलपाकान्तं विज्ञानकलत्वमेवेत्युक्तं श्रीमद्रौरवादौ ॥ १० ॥

प्रळयाकलेषु येषां
पक्वेमलकर्मणी व्रजन्त्यन्ये।
पुर्यष्टकदेहयुता
योनिषु निखिलासु कर्मवशात् ॥ ११ ॥

प्रलयाकलेषु मध्ये **येषां** मलः पक्वस्तत्पाकवशादेव **कर्मा**पि समस्तं पक्वं ते **व्रजन्तीति** मोक्षमिति शेषः। मलपरिपाकस्य शक्तिपातद्वारेण मोक्षहेतुत्वात्। यदुक्तं श्रीमन्मृगेन्द्रे-'तमश्शक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ। व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरणोश्शिवः' इति ॥ श्रीमत्स्वायंभुवेऽपि 'क्षीणे तस्मिन्धिया सा स्यात्परं निःश्रेयसं प्रति' इति। **अन्ये** त्वपक्वमलाः **पुर्यष्टकदेहयुताः** सन्तः **कर्मवशेन** तद्भोगार्थं **निखिलासु योनिषु** भुवनजशरीरात्मिकासु व्रजन्तीति पूर्वक्रियानुषङ्गोऽत्रापि कर्तव्यः। एते इति पाठापेक्षायां पुर्यष्टकदेहयुताः योनिषु व्रजन्तीति व्याचक्षेत। तेषां मोक्षः श्रुतिविरोधः पक्वमलानामपि पुनः संसारयोगादनिर्मोक्षप्रसङ्गश्च दोषः ॥ ११ ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अथ किं तत्पुर्यष्टकमित्यत आह—

स्यात्पुर्यष्टकमन्तः
करणं धीकर्मकरणानि ।
कांश्चिदनुगृह्य वितरति
भुवनपतित्वं महेश्वरस्तेषाम् ॥ १२ ॥

तत्र **पुर्यष्टकं** नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तंमोक्षान्तं वाऽवस्थितः पृथिव्यादिकलान्तत्रिंशत्तत्त्वात्मकोऽसाधारणरूपः सूक्ष्मदेहः । यच्छ्रूयते—'प्रयोक्त्र्यादिमहीप्रान्तमेतदण्वर्थसाधकम् । प्रत्यात्मनियतम्' इति तत्त्वसङ्ग्रहेऽपि— वसुधाद्यस्तत्त्वगणः प्रतिपुंनियतः कलान्तोऽयम् । पर्यटति, कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु' इति । अतश्चायमर्थः । अन्तःकरणशब्देन मनोबुद्ध्यहंकारवाचिनाऽन्यान्यपि पुंसो भोगक्रियायामन्तरङ्गानि कलाकालनियतिविद्यारागप्रकृतिगुणाख्यानि सप्त तत्त्वानि उपलक्ष्यन्ते । **धीकर्म**शब्देन बुद्धेरध्यवसिततया ग्राह्याणि पृथिव्याद्याकाशान्तानि पञ्चभूतानि तत्कारणानि च शब्दादीनि पञ्चतन्मात्राणि उच्यन्ते। करणशब्देन बुद्धीन्द्रियाणि कर्मेन्द्रियाणि दर्शयति ननु 'शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्' इति श्रीमत्कालोत्तरे श्रूयते।

Center for Shaiva Studies, Pondicherry Collection

lic Domain, Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

सत्यम् । अत एव तत्सूत्रं तत्रभवता रामकण्ठेन त्रिंशत्तत्त्वपरतया व्याख्यातम् । कथं पुनरस्य पुर्यष्टकत्वम् । भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणेन गुणेन तदापूरकेण प्रधानेन कलादिपञ्चकंचुकात्मना वर्गेणारब्धत्वादित्यविरोधः । अथ तेषु पुर्यष्टकयुक्तेषु मध्ये कांश्चिदनुगृह्य महेश्वरः मन्त्रमहेश्वर इत्यर्थः । गुह्यातिगुह्यगुह्यतरपवित्रस्थाण्वाख्यपञ्चाष्टकादीनां भुवनपतीनामनन्तानियुक्तत्वेनैव श्रुतेः । सांजनत्वाच्च । अनुगृह्येति । स्वाधिकारान्तं प्रकटीकृतज्ञानक्रियानणिमादियोगिनश्च कांश्चिद्विशिष्टपुण्यवतः कृत्वेत्यर्थः ॥ १२ ॥

शेषा भवन्ति सकलाः
कलादियोगादहर्मुखे काले ।
शतमष्टादश तेषां
कुरुते स्वयमेव मन्त्रेशान् ॥ १३ ॥

अनतिपक्वमलत्वेन संसारयोगिभ्यश्च ये शेषाः पक्वमलाः सन्तोऽपि तत्पाकमान्द्यान्मायागर्भाधिकार योग्यास्तेऽपि सर्गप्रारम्भेऽधिकार निबन्धनेन कलादिना योगात्सकला भवन्ति । तद्योगेऽपि ते मलरहितत्वात् शेषा इत्युक्ताः । कियन्तस्ते केन नियुक्ता इत्यत आह—शतमष्टा-

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

दशेति । तेषामष्टादशाधिकशतं स्वयमेव शिवो ह्यपनीतमलान्कृत्वा मन्त्रेशपदे योजयति । न तु ते अनन्तानियुक्ता इत्यर्थः । कलादियोगस्तु तेषामनन्तकर्तृक एव । 'अनन्तोऽसि ते प्रभुः' इत्युक्तत्वात् ॥ १३ ॥

तानेव विभजति—

तत्राष्टौ मण्डलिनः
क्रोधाद्यास्तत्समाश्च वीरेशः ।
श्रीकण्ठः शतरुद्राः
शतमित्यष्टादशाभ्यधिकम् ॥ १४ ॥

अत्र मण्डलिनोऽष्टौ कला मस्तकवासिनो गहनेशादयः क्रोधादयश्च गुणमस्तकस्थाः अष्टावेव वीरेशो वीरभद्रः शतरुद्राधिष्ठाता । श्रीकण्ठो गुणतत्त्वनिलयोऽधस्तनभुवनादेश्च कर्ता । शतरुद्रास्तु ब्रह्माण्डाधारका इति ॥ १४ ॥

परिपाकमलानेता-
नुत्सादनहेतुशक्तिपातेन ।
योजयति परे तत्त्वे
स दीक्षयाऽऽचार्यमूर्तिस्थः ॥ १५ ॥

अथ त्रिबन्धनबद्धेषु सकलेषु मध्ये सः शिवः । परितः

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

समन्तादाधिक्येन पक्वमलान् सकलान तिरोधानशक्त्युपसंहारेणानुग्रहशक्त्या पाशनिरोधनादिकया स्पृष्टान गुरुमधिष्ठाय दीक्षया परे पदे शिवसाम्यरूपे योजयति । मन्दमलपाकास्तु मन्दतरादिशक्तिपातेन विद्येश्वरादिपदे योजयति । यच्छ्रूयते— 'रुद्रमन्त्रपतीशानपदभाजो भवन्ति ते । स्थितौ याननुगृह्णाति गुरुमास्थाय चिद्गतः' इति । 'यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः । सिद्धिभाङ्मन्त्रामिध्यादि' इति, च । अत एव विज्ञानप्रलयकेवलयोः निराधिकरण एव शिवस्यानुग्रहसिद्धिः । अत एव मलस्य द्रव्यत्वाच्चक्षुषः पटलादेरिव दीक्षाख्येनैवेश्वरव्यापारेण निवृतिः । न तु ज्ञानमात्रादिति भावः ॥ १५ ॥

अपरिपक्वमलांस्तु—

बद्धाञ्शेषानपरा-
न्विनियुङ्क्ते भोगभुक्तये पुंसः ।
तत्कर्मणामनुगमा-
दित्येवं कीर्तिताः पशवः ॥ १६ ॥

एष च प्रागुक्तानुवादः अथ पशुपदार्थमुपसंहरति— इत्येवं कीर्तिताः पशवः इति । १६ ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अथ पाशपदार्थभेदमाह—

पाशाश्चतुर्विधाः स्युः
पुंसो मलकर्मजौ मतौ प्रथमौ ।
मायेयतिरोधायक-
शिवशक्तिसमुद्भवौ चान्यौ ॥ १७ ॥

ननु प्रागर्थपञ्चकं पाश इत्युक्तम् । अत्र तेषां चतुर्विधत्वोक्तिर्विरुद्धेति चेन्न । बिन्दोर्महामायात्मनः परमुक्त्यपेक्षया पाशत्वेपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरमुक्तित्वादत्र पाशत्वेनानुपादानमित्यविरोधः । अत एवाह **पुंस** इति । पुंस्त्वमलयोगिनः सकलस्येत्यर्थः । अत एव शुद्धाध्ववासिनामनन्तादीनां महामायारोधशक्त्यात्मकमेव पाशद्वयं विद्यते । तच्च मायादिवन्न मोहकं अपि तु बोधकमेवेति सर्वं सुस्थितम् । ननु यन्नादाख्यं परं बीजं सर्वभूतेष्ववस्थितमिति श्रुतः सकलस्यापि बिन्दुकार्ययोगः । सत्यम् । सर्वज्ञत्वाद्यविनाभूतेन बैन्दवशरीरादिनास्य योगो नास्तीत्येवमुक्तम् । के ते इत्याह— **मलकर्मजौ मतौ प्रथमाविति** । मलकर्मरूपावेवात्र मलकर्मजाविति कार्यकारणयोरभेदेनोपचारादुच्येते । तयोरेवानन्तरसूत्रे लक्षणस्य वक्ष्यमाणत्वात् । तत्तत्कार्यकारणयोरावरणभोगभोजनयोः फलरूपतया पाशत्वेन प्रसि-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

द्वेश्च । एवं 'मायेयतिरोधायिकशिवशक्तिसमुद्भवा' वित्यत्रापि द्रष्टव्यम । प्रथमा वनादि सिद्धौ । तत्र मलः पुंसोऽनादि कृत्वा ज्ञानक्रियावारकः । कर्मापि प्रवाहानादिबीजाङ्कुरादिन्यायेन कर्मजशरीरसन्तानस्याप्यनादित्वेन स्थितः मायेयस्तु कलादिरागंतुकः पाशः कर्मसद्भाव एव तस्य सद्भावात् । तदभावेपि प्रलयकेवलिनो मलकर्मयोगाच्च शिवशक्तेस्तु पाशाधिष्ठानेन आत्मनि तिरोधायिकत्वादुपचारेण पाशत्वमुक्तम् । वक्ष्यामश्च ॥ १७ ॥

तत्र मललक्षणमाह—

एको ह्यनेकशक्ति-
र्दृक्क्रिययोश्छादको मलः पुंसः ।
तुषकम्बुकवज्ज्ञेय-
स्ताम्राश्रितकालिमावद्वा ॥ १८ ॥

एक एव मलो जडत्वे सति नित्यत्वाज्जडानामनेकानां घटादिवदनित्यत्वं स्यात् । यद्येवं मलस्य एकत्वादेकस्य मोक्षार्थं तस्य निरोधे सर्वमोक्षप्रसङ्गः । अत आह—अनेकशक्तिरिति । अनेकात्मावारकानेकशक्तियुक्तः अतः एकस्याः शक्तेः परिपाकेन तिरोधानेन तदावार्यस्यैव मोक्षः ।

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तुषकम्बुकवादिति । यथा तण्डुलताम्रयोरनाद्यावारकत्वेन सहजन्तुषादि कालिका वा पश्चात्पाकेन रसशक्त्या निवर्तते एवं मलोऽप्यात्मनोऽनाद्यावारकः पाकवशाद्दीक्षया निवर्तते यदि वा । यथा शाल्यादेस्तुषाद्यङ्कुरोत्पत्तौ निमित्तम् । एवमात्मनो मलः शरीराद्युत्पत्तौ निमित्तम् । यथा वा ताम्रस्य कालिमा रसशक्त्या निवर्तते तथा मलः शिवशक्त्या निवर्तते इत्येतावदात्मनो दृष्टान्तः । न तु सर्वसाम्येनेति ॥

कर्मानादिप्रोक्तं
धर्माधर्मात्मकं विचित्रं च ।
माया च वस्तुरूपा
मूलं विश्वस्य नित्या सा ॥ १९ ॥

कर्मणोऽनादित्वं प्रवाहानादितयेत्युक्तम् । **वैचित्र्यं च** साधनभेदात् साधनं च कर्त्रादिविशेषः विचित्रभोगभेदात्मकफलदर्शनाच्च । **माया च** तावद्वस्तुरूपा । न तु वेदान्तवादिनामिवासत्यरूपा । **विश्वस्य** कलादेस्साधारणस्य । भुवनाद्यात्मनोऽसाधारणस्य सूक्ष्मदेहात्मनः उभयरूपस्य भुवनजशरीरात्मनश्चाशुद्धस्य सर्वस्य जगतो **मूलमुपादानम्** । उपादानं विना कार्यानुत्पत्तेः । **सा च नित्या** परमकारणत्वात् । अनित्यत्वे त्वनवस्थाप्रसङ्गाच्च । अत एवैका सा

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ज्ञेया । एष च न्यायश्शुद्धाध्वोपादानभूतस्य बिन्दोरपि समानः । ननु तत्र उद्देशसूत्रे मायेयः पाशत्वेनोद्दिष्टः अत्र मायाया लक्षणमुक्तमिति विरोध इति चेत् सत्यम् । मायायास्स्वतो बन्धकत्वाभावात्तत्र तत्कार्यमुद्दिष्टम् । अत्र तु तस्य कारणाधीनत्वात्कारणस्य लक्षणमुक्तम् । कार्यस्य तु विस्तृतत्वात्पश्चाल्लक्षणमभिधास्यत इत्यविरोधः ॥ १९ ॥

इत्थं साक्षात्पाशत्रयमुक्त्वा शक्तेरुपचारेण पाशत्वमिति दर्शयन्नुक्तार्थमुपसंहरति —

पाशानुग्राहित्वा-
त्पुरुषतिरोधायिका विभोश्शक्तिः ।
पाशत्वेनाभिहिता
कथिताः पाशाश्चतुर्विधास्त्वेवम् ॥

इत्थं सकलविषयं पाशत्रयमुभयविषयं तिरोधानशक्तिं चोक्त्वा मायोत्तीर्णविषयं शुद्धाध्वस्वरूपं पाशमाह—

शुद्धानि पञ्चतत्वा-
न्याद्यन्तेषु स्मरन्ति शिवतत्वम् ।
शक्तिसदाशिवतत्वे
ईश्वरविद्याख्यतत्वे च ॥ २१ ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

शुद्धानि शुद्धतत्त्वानि। किं तानि नित्यानि उतानित्यानि। नित्यत्वे सृष्टिविरोधः। अनित्यत्वे किं तेषामुपादानमित्यत आह— **तेषु** मध्ये **शिवतत्त्वं** बिन्द्वात्मकं आद्यं प्रधानमुपादानं **स्मरन्ति पूर्वाचार्याः**। परमोपादानत्वेनैव चास्य मायावन्नित्यत्वं सिद्धमित्युक्तम्। अतश्चान्यानि चत्वारि तानि तत्कार्याणीति भावः। तदुक्तम् मायोपरि महामायेति। इदमत्राकूतम्। विद्यादितत्त्वानां विचित्रभुवनादिसन्निवेशादिमत्त्वेन श्रुतेः कार्यत्वाव्यभिचारात्तत्तत्त्ववासिनां च शरीरादियोगात्तत्कारणं महामायात्मकं सिद्धमिति। यदुक्तम्। उपादानं शरीराणां विद्याविद्येश्वरात्मनाम्। इति। किञ्च नादादिद्वारेण मन्त्रतन्त्राद्युत्पादकत्वमप्यस्याश्श्रूयते। शक्तेर्नादो भवेद्बिन्दुरक्षरं मातृका ततः। इत्यादि। इत्थं बिन्द्वात्मकं शिवतत्त्वं प्रसाध्य तत्कार्याणि चत्वारि तानि किन्नामानीत्यत आह—**शक्तिसदाशिवेति**॥

एवं शुद्धानि तत्त्वानि सङ्ख्यातो नामतश्च उक्त्वा अथो अशुद्धान्यपि तथैवोद्दिशति।

पुंसोऽज्ञकर्तृतार्थं
मायातस्तत्त्वपञ्चकं भवति।
कालो नियतिश्च तथा
कला च विद्या च रागश्च ॥ २२ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

पुंसो बद्धात्मनो अज्ञकर्तृतार्थे अज्ञत्वकर्तृत्वसिद्धौ मायात: साक्षात्पारम्पर्येण च कालादि तत्त्वपञ्चकं भवति । पञ्चकञ्चुकयुक्तस्यास्य भोक्तृत्वेन पुंस्त्वमलयोगात्पुरुषतत्त्वाख्या भवतीति वक्ष्यति ॥ २२ ॥

किं च ।

अव्यक्तं मायातो
गुणतत्त्वं तदनु बुद्ध्यहङ्कारौ ।
चेतो धी कर्मेन्द्रिय-
तन्मात्राण्यनु च पञ्चभूतानि ॥ २३ ॥

धीकर्मेन्द्रियेति । बुद्धीन्द्रियकर्मेन्द्रियाणीत्यर्थ: । अव्यक्तादीनि पञ्चविंशतितत्त्वानि । मायात: पारम्पर्येणोत्पन्नानीति वक्ष्याम: । अत्र लक्षणोक्त्यवसरेण । एतेषां च ॥ २३ ॥

पुरुषस्य भोगहेतो:
प्रधानतो विंशतिर्भवेत्यधिका ।
यस्मात्प्रकृतिगुणानां
नात्यन्तं वस्तुतो भेद: ॥ २४ ॥

सर्वेषां चैषां कुत्रकुत्रोपयोग: किं च प्रधानात्साक्षाज्जा-

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata a

तानि कानि तत्वान्तरव्यवधानेन जातानि कानीति सर्वं दर्शयिष्यामः। ननु अव्यक्तं मायात इत्यादिना प्रकृत्यधस्तनतत्वानां चतुर्विंशतेरुक्तत्वात्कथमत्र त्र्यधिका विंशतिरुच्यते अत आह। यस्मात्प्रकृतिगुणानामिति। गुणानामेव प्रकृतित्वेन साङ्ख्यैरभ्युपगमात् तन्निरासाय तेषामचैतन्ये सत्यनेकत्वाद्घटादीनामिव कारणान्तरेण भवितव्यमिति प्रकृतिसिद्धिरस्माभिरुच्यते। ततः कार्यकारणयोरभेदविवक्षयैवमुक्तमित्यविरोधः ॥ २४ ॥

अथोद्दिष्टेषु तत्वेषु प्रथमोद्दिष्टन्तावच्छिवतत्व लक्षयति।

व्यापकमेकं नित्यं
कारणमखिलस्य तत्वजातस्य।
ज्ञानक्रियास्वभावं
शिवतत्वं जगदुराचार्याः ॥ २५ ॥

यस्प्राक् शुद्धाध्वोपादानत्वेन बिन्द्वात्मकं **शिवतत्वं** साधितं तत् **व्यापकं** शुद्धाशुद्धात्मनो जगतो निजपरिणतिरूपाभिर्निवृत्यादिभिः कलाभिर्विश्वं व्याप्नोतीत्यर्थः। यदाहुः। कलावस्थानि तत्वानि तत्वस्थो भुवनव्रजः। इत्यादि। तच्च **एकम्** परमकारणत्वात्। अनेकत्वे हि जडत्वे सत्यने-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

कत्वाद्धटादिवत्कार्यं स्यादित्युक्तम् । अत एव **नित्यम्** । अनित्यत्वे परमकारणत्वाभावात्तस्यापि च उपादानान्तरापेक्षाया-मनवस्थाप्रसङ्गाच्च **निखिलस्य** च शुद्धरूपस्य **तत्त्वजातस्य कारणं** उपादानम् । न त्वशुद्धस्य तत्त्वस्य । तस्य मायोत्पन्नत्वेनोक्तत्वादस्य च शुद्धत्वेनाशुद्धकारणत्वायोगात् । किंच । ज्ञानक्रिये स्वस्मिन् स्थिते आत्मनां भावयतीति **ज्ञानक्रियास्वभावम्** अयमर्थः तत्तद्भुवनेश्वराराधनात् दीक्षया वा स्वकार्यभूतशुद्धाध्वभुवनप्राप्तानां ज्ञानक्रिये प्रकटयतीति । यदुक्तम् श्रीमन्मतङ्गे । शान्त्यतीतं परं तत्त्वमविनाश्यव्ययात्मकम् । येनोन्मीलितसामर्थ्याः पशवो जीवतां गताः ॥ इति । अत एवास्य बोधकत्वम् । ननु मायापि कलादिद्वारेण ज्ञानक्रियाप्रकाशिकेत्युक्तम् । सत्यम् । मायोत्पन्नस्य ज्ञानादेः किंचिद्विषयत्वादनात्मादावात्मादिभावनाहेतुत्वाच्च सा मोहिका । इदं तु सर्वविषयज्ञानादिप्रकाशत्वाच्छास्त्रसिद्धोत्पादनद्वारेण शिवादिशुद्धवस्तुबोधकत्वाच्च बोधकमित्यविरोधः । यद्वा ज्ञानक्रियाख्यं *स्वं धनमात्मनां भावयत्यभिव्यनक्तीति ज्ञानक्रियास्वभावम् । अथवा ज्ञानक्रिये अस्य न स्वभाव इति । नञ् प्रश्लेषणाज्जडरूपतया व्याख्येयम् । ननु ज्ञानस्वभावतया उपादानत्वेन मृदादिवदचेतनत्वात् ज्ञानस्व-

*स्वबन्धनामिति पाठभेदः.

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

भावस्योपादानत्वायोगात् । तदुक्तम्--श्रीमत्पराख्ये । निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् । इति । अन्यत्राप्युक्तम् । सा च कुण्डलिनी शंभोः शक्तिः शुद्धा जडात्मिका । इति । एवंभूतमुपादानरूपं महामायाख्यं शिवतत्त्व माचार्या जगदुरिति । न त्वियमार्या परमशिवविषयतया तच्छक्तिविषयतया वा व्याख्येया । शिवादिपृथिव्यन्ततत्त्वलक्षणप्रस्तावे तत्त्वातीतयोस्तयोरत्राप्रस्तुतत्वात् । तयोरेव शिवतत्त्वरूपत्वेन शुद्धाध्वोपादानत्वाभ्युपगमे परिणामित्वादचेतनत्वादिदोषप्रसङ्गात्। न च चिद्विवर्ताभ्युपगमो युक्तः । सर्वप्रमाणसिद्धत्वेन जगतोऽसत्यत्वाभावात् । विवर्तस्य चासत्यत्वाभ्युपगमात् । शिवतत्त्वसंज्ञाया बिन्द्वात्मनः कुण्डलिन्याश्रितसमवायाभावेन परिग्रहशक्तित्वेन श्रवणाच्च प्रोक्तैव व्याख्या युक्ता । तदुक्तम् । नात्र शक्तिरुपादानं चिद्रूपत्वात्तथा शिवः । परिणामोचितः प्रोक्तश्चेतनस्य न युज्यते । चिन्तो विवर्त एवोक्तस्तथात्वे कार्यशून्यता । सर्वप्रमाणसंसिद्धिं चिद्विवर्तं कथं जगत् । मायापि नात्रोपादानं मोहकत्वात्स्वतेजसा । सा च कुण्डलिनी शम्भोः शक्तिः शुद्धा जडात्मिका न तादात्म्यात्स्थिता किन्तु वर्तमाना परिग्रहे । शिवे कर्तरि तादात्म्यान्नेयं कुण्डलिनी स्थिता । उपादानं त्वतो हेतोः कुलाले मृत्तिका यथा इति । शब्दब्रह्मवादिपक्षेणापि आत्मन एव नादादि-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

क्रमेण बहुधावस्थानं न युज्यत इत्युक्तम् नादकारिकासु।
अविकार्यन्नात्मोक्तस्तच्छक्तिश्चाप्यतो न योग्यौ तौ। बहुधा
स्थातुं यद्वा चैतन्यविनाकृतौ विकारित्वात्। इत्यादि।
अतः शब्दोत्पादनत्वेनापि महामाया सिध्यतीत्येवमादिवि-
स्तरेणास्माभिर्मृगेन्द्रवृत्तिदीपिकायां दर्शितमिति ततो
ऽवधार्यम्॥ २५॥

अत एव—

अस्मिन्निलीय निखिला
इच्छाद्याः शक्तयः स्वकं कार्यम्।
कुर्वन्ति तेन तदिदं
सर्वानुग्राहकं प्राहुः॥ २६॥

इच्छाद्याः शिवशक्तयः **अस्मिन्** उपादाने प्रथमं **निलीय** तदधिष्ठानेन **स्वकं** मनुग्राह्यानुग्राहकलक्षणं **कार्यं** तच्छेषभूतं च सृष्ट्यादिकं कुर्वन्ति। ततस्तादिदमपि परंपरया सर्वानुग्राहकत्वात् **सर्वानुग्राहकं** प्राहुः। न तु शक्त्यधिष्ठाननैरपेक्ष्येणास्वातन्त्र्यात्। अचेतनस्य चेतनाधिष्ठानं विना कार्योत्पादनायोगात्॥ २६॥

इत्थं शिवतत्त्वं प्रसाध्य तत्कार्यभूतं शक्तितत्त्वमाह—

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

चिदचिदनुग्रहहेतो-
रस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तितत्त्वमभि-
हितमविभागापन्नमस्यैव ॥ २७ ॥

शिवो हि **चिता**मात्मना**मनुग्रहं** मोक्षं कर्तुमिच्छुस्तेषां मलपाकाय कर्मभोगार्थं च सृष्ट्यादि कृत्वा पाशाना**मचि**दामनुग्रहं स्वव्यापारसामार्थ्योत्पादनं करोति । अत्र पाशानुग्रहे साध्ये प्रथमोपादानत्वाद्बिन्दुः साधनमित्युक्तम् । अतोऽयमर्थः पर्यवसन्नः । सिसृक्षोः परमेश्वरस्य चिदाचिद्विषयो योऽनुग्रहः तद्धेतोः तत्साधनरूपस्य **अस्य** बिन्दोर्य आद्य उन्मेषः प्रथमः परिणामः । शान्त्यादिभुवनात्मको नादात्मकश्च **तच्छक्तितत्वमुच्यते** । नन्वेतच्छक्तितत्त्वं बिन्द्वादिवन्निरवयवमुत सावयवमत आह । **अविभागापन्नमिति** विभज्यन्ते एभिः पदार्थाः परस्परं विविच्यन्त इति विभागा अवयवाः । अविभागापन्नं निरवयवस्वरूपम् । **अस्यैव** परमकारणस्य बिन्दोर्मायाया वा शक्तिरूपस्यैव परमकारणत्वात् । *शक्त्यादीनि तु कार्यरूपाणि तत्त्वानि व्यक्तत्वेन भुवनाद्याधारत्वात्सावयवान्येव । ननु शिवतत्त्वेपि

* शान्त्यादीनि तु इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

भुवनानि श्रूयन्ते । सत्यं । न तु साक्षात् । किन्तु शान्तिकलामस्तक एव तानि स्थितानि मायाभुवनानीव कलामस्तक इत्यविरोधः ॥ २७ ॥

अथ सदाशिवतत्त्वमाह —

ज्ञानक्रियाख्यशक्त्यो
रपकर्षोत्कर्षयोरभावेन ।
यः प्रसरस्तं प्राहुः
सदाशिवाख्यं बुधास्तत्त्वम् ॥ २८ ॥

सिसृक्षुत्वेन प्रागुक्तस्य परमशिवस्य ज्ञानक्रियाशक्त्यो साम्येनाधिष्ठानात् तस्यैवोपादानतयोक्तस्य बिन्दोर्यो द्वितीयः **प्रसारः** परिणामः । शक्तितत्त्वव्यवधानेन जायते **तत्सदाशिवतत्त्व** माहुः ॥ २८ ॥

तृतीये तु प्रसरे—

न्यग्भवति यत्र
शक्तिर्ज्ञानाख्योद्वृत्ततां क्रिया भजते ।
ईश्वरतत्त्वं तदिह
प्रोक्तं सर्वार्थकर्तृ सदा ॥ २९ ॥

यत्र जगत्कर्त्रनन्ताद्यधिष्ठानेन क्रियाशक्तेः व्यापारबाहु-

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ख्यं तत्सादाख्यतत्त्वाधस्तनं प्रसरमीश्वरतत्त्वमाहुः । तस्य च सर्वार्थकर्तृत्वं क्रियाशक्त्याधिष्ठितत्वात् सर्वकर्तृणामनन्तादीनामत्रैवान्तर्भावस्य वक्ष्यमाणत्वाच्च ॥ २९ ॥

तथा ।

न्यग्भवति कर्तृ-
शक्तिर्ज्ञानाख्योद्रेकमश्नुते यत्र ।
तत्तत्त्वं विद्याख्यं
प्रकाशकं ज्ञानरूपत्वात् ॥ ३० ॥

यत्त्वीश्वरतत्त्वाधस्तने बिन्दुपरिणामरूपे तत्त्वे सप्तकोटिमहामन्त्राधिष्ठानेन ज्ञानशक्तेरुद्रेको भवति । तत्तत्त्ववासिनां ज्ञानरूपत्वात् सर्वज्ञत्वप्रकाशहेतुत्वात् प्रकाशकं तद्विद्यातत्त्वमुच्यते ॥ ३० ॥

इत्थं शुद्धतत्त्वान्यभिधाय तेष्वेव वस्त्वन्तरस्यान्तर्भावमाह—

नादो बिन्दुः सकलः
सादाख्यन्तत्त्वमाश्रितौ कथितौ ।
विद्येशाः पुनरैशे
मन्त्राविद्याश्च विद्याख्ये ॥ ३१ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तत्र परबिन्दोः शिवतत्त्वेन तत्कार्यस्य सूक्ष्मनादस्य शक्तितत्त्वान्तर्भावेन चोक्तत्वात् **सकलो बिन्दुः अक्षरबिन्द्वात्मको नादश्च स्थूलध्वनिरूपः । द्वौ च सदाशिवतत्त्वान्तर्भूतौ ज्ञेयौ** । विद्येशानामनन्तादीनामीश्वरतत्त्वेन्तर्भावः । मन्त्राणां सप्तकोटिसङ्ख्याकानां वाचिकशब्दानां च व्योमव्याप्यादीनां विद्यानां च कामिकाद्यष्टाविंशतितन्त्राणां विद्यातत्त्वेन्तर्भावः ॥ ३१ ॥

पञ्चानामप्येषां न हि
क्रमोऽस्तीह कालरहितत्वात् ।
व्यापारवशादेषां
विहिता खलु कल्पनाशास्त्रे ॥ ३२ ॥

इति काचिदार्या केषु चित्पुस्तकेषु दृश्यते । तदसत् 'द्वयोरप्यध्वनोरेवं क्रमप्रसवयोगिनोः । विलयः प्रातिलोम्येन शक्तितत्त्वद्वयावधिः' । इत्यादिभिरेषां सृष्टिसंहारक्रमप्रतिपादकैस्तत्तद्भुवनवासिनामवस्थानभेदाभिधायिभिः शुद्धाध्वन्यपि शुद्धकालसद्भाववेदिभिर्वाक्यैर्विरोधात्सेयमशास्त्रज्ञैः प्रक्षिप्तेत्युपेक्ष्यैव ॥ ३२ ॥

शिवस्यापि सदाशिवादिभेदः शास्त्रेषु श्रूयते स किम् । परमार्थतो न वेत्यत आह—

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तत्त्वं वस्तुत एकं
शिवसंज्ञं चित्रशक्तिशतखचितम् ।
शक्तिव्यापृतिभेदात्
तस्यैते कल्पिताभेदाः ॥ ३३ ॥

परमार्थतः परमशिवाख्यमधिष्ठातृरूपं तत्त्वमेकमेव तस्य कर्तृत्वेन चैतन्याव्यभिचारात् । चैतन्यतस्य च विकारित्वाभावादित्युक्तम् । तच्च चित्रशक्तिशतखचितम् । शक्तेर्ज्ञेयकार्यानन्त्यादौपाधिकानन्तभेदाभिन्नया शक्त्या समवेतमित्यर्थः । ततश्चास्य शक्तिव्यापारभेदादुपचारेण सदाशिवादिभेदाः काल्पनिका एव नतु परमार्थतः । अधिष्ठेयस्य तु बिन्दोः शिवतत्त्वाद्यवस्थाभेदः सत्य एवेत्युक्तम् । यच्चोच्यते । किन्तु यः प्रतिभेदोऽस्मिन् सशास्त्रे शक्तिभेदतः । कृत्यभेदोपचारेण तद्भेदस्थानभेदजः ॥ इत्यादि । लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु । स बिन्दुरिति मन्तव्यः सैव कुण्डलिनी मता॥ इति अत एव सदाशिवाद्याकारकल्पनमपि तस्य ध्यानार्थमेव नतु परमार्थत इत्युक्तम् । श्रीमत्पौष्करे— ‘साधकस्य तु लक्ष्यार्थं तस्य रूपमुदाहृतम् । इति श्रीमन्मृगेन्द्रेऽपि । वपुषो विद्यमानत्वाद्यत्कृत्यं करोति सः । तत्र तत्रास्य तत्कर्तृवपुषानुकृतं वपुः ॥ इति ॥ ३३ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एतदेवाह—

चिदचिदनुग्रहहेतो-
रूपाण्येतानि स प्रभुः कृत्वा ।
कुरुते चितामनुग्रह-
मनादिमलरुद्धशक्तिनाम् ॥ ३४ ॥

शिवो हि चिदनुग्रहार्थमेव एतानि रूपाणि करोति । सदाशिवादिध्येयाकारानधितिष्ठतीत्यर्थः । ततस्तानधिष्ठायाचिदनुग्रहोपचितानामात्मनामेवानुग्रहं करोति । तस्यापि चिदचिदनुग्रहार्थत्वेनोक्तत्वात् । अनादिमलरुद्धशक्तीनामित्येतदनुग्रहापेक्षायां विशेषणद्वाराहेतुः ॥ ३४ ॥

तमेव चिदचिद्विषयमनुग्रहं दर्शयति—

भुक्तिं मुक्तिमणूनां
स्वव्यापारे समर्थताधानम् ।
जडवर्गस्य विधत्ते
सर्वानुग्राहकः शंभुः ॥ ३५ ॥

नन्वस्तु मोक्षो अनुग्रहः । दुःखनिवृत्तिहेतुत्वात् भोगस्तु सुखदुःखसंवेदनात्मकः स कथमनुग्रहत्वेनोच्यते अत आह ॥

चिदचिदनुग्रहो यं
किल यो मोक्षश्शिवसमानता रूपः ।

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

सोनादित्वात्कर्मण
इह भोगमृतेन याति संसिद्धिम् ॥

सत्यं पाशनिवर्तनेन सर्वार्थदृक्क्रियात्मकशिवतत्वव्यक्त्या च शिवसाम्यरूपस्य मोक्षस्यैवानुग्रहत्वम् । भोगस्य तु (नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपीति) न्यायात् कर्मक्षयहेतुतया परम्परयानुग्रहहेतुत्वमित्यनुग्रहतयोक्तमित्यविरोधः ॥ ३६ ॥

एवं पाशानुग्रहोपि भोगभोजनद्वारेण पश्वनुग्रहार्थमेवेत्यत आह—

तेनाविभुस्तद्भुक्त्यै
कुरुते तनुकरणभुवननिष्पत्तिम् ।
कर्त्रा विना न कार्यं
न तथोपादानकरणाभ्याम् ॥ ३७ ॥

तत्र तनुकरणशब्देनासाधारणी सूक्ष्मशरीरसृष्टिरुच्यते । भुवननिष्पत्तिशब्देन साधारणीभुवनाद्यात्मिका साधारणासाधारणी च भुवनजशरीरात्मिका सृष्टिरुच्यते । एतच्चानन्तादिद्वारेण करोतीत्युक्तम् । अत्र चोदयति **कर्त्राविनेति** यथाकार्यस्य कर्तारं विना नोत्पत्तिदृष्टा तथोपादानकरणेपि

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

विनेति शिवस्यापि तनुकरणादेरशुद्धाध्वन्युत्पादे किमुपादानं किं वा करणमिति पूर्वःपक्षः ॥ ३७ ॥

सिद्धान्तस्तु—

शक्तय इहास्य करणं
मायोपादानमिष्यते सूक्ष्मा ।
एका नित्या व्यापि-
न्यनादिनिधना शिवासक्ता ॥३८॥

प्राग्वदुपाधिभेदभिन्नाशक्तिरेवेहाशुद्धाध्वन्यपि तस्य करणम् । उपादानन्तु **माया** सा च **सूक्ष्मा** अमूर्ता । परमकारणत्वेन शक्तिरूपत्वात्सा च **एका** अचैतन्ये सत्यनेकत्वे नित्यत्वं सिद्धमित्यत एकेति भावः । **नित्या** आद्यन्तरहितत्वात्सृष्टिसंहारप्रबन्धस्य नित्यत्वेनावस्थानात् तत्याप्याद्यन्तविरहादतः **व्यापिनी** सर्वस्य कलादेः स्वकार्यस्य च । उत्पत्तिविनाशशून्यत्वात् **अनादिनिधना शिवेत्वसक्ता** असमवेता उपादानत्वेन बिन्दुवत्परिग्रहशक्तित्वात् ॥ ३८ ॥

साधारणी नराणां
कारणमपि चेयमखिलभुवनानाम् ।
निखिलजनकर्म
खचितास्वभावतो मोहसञ्जननी ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

आत्मनाश्चसाधारणी कारणमखिलभुवनानामित्युपलक्षणं देहादेरपि। प्रलयकाले च बुद्धेरपि तत्रैव लयात् बुद्धिगुणरूपैर्निखिलात्मकर्मभिरुपेता। कर्म हि कृष्यादिवत्प्रकृतिसंस्काररूपत्वाद्बुद्धिगुणत्वेनैवेष्यते। नात्मगुणत्वेन। तस्य विकारित्वप्रसङ्गात्। मोहिका चेयम् अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मप्रतिपत्तिहेतुत्वात् ॥ ३९ ॥

ततश्च।

कर्माण्यपेक्ष्य शम्भु-
मायां विक्षोभ्य शक्तिभिः स्वाभिः।
प्रतिपुरुषं भोगार्थं
वपूंषि करणानि चाधत्ते ॥ ४० ॥

शिवोऽप्यात्मनां कर्माणि प्रलये पक्वानि बुद्ध्वा तद्भोगार्थं स्वशक्त्याधिष्ठिताभिरनन्तशक्तिभिर्मायां विक्षोभयति। प्रसवाभिमुखीं करोति। तदुक्तम्। श्रीमद्रौरवे। वामादिशक्तिभिर्युक्तः शिवेच्छा विधिचोदितः। विद्या राजाधिराजेशो मायां विक्षोभ्य मन्त्रराट्। कलामुत्पादयामासेति। विक्षोभ्य तदधिष्ठानेनैव प्रतिपुरुषं भिन्नानि वपूंषि स्थूलशरीराणि। करणोपलक्षितांश्च सूक्ष्मदेहान् च शब्दात्साधारणानि भुवनादीनि च सृजति ॥ ४० ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अथ कलादिपृथिव्यन्तात्रिंशत्तत्त्वानां सूक्ष्मदेहोपकारितां दर्शयितुं तत्सृष्टिक्रमः कथ्यते ।

नानाविधशक्तिमयीं
सा जनयति कालतत्त्वमेवादौ ।
भावि भवद्भूतमयं
कलयति जगदेष कालोऽतः ॥ ४१ ॥

सत्कार्यवादाभ्युपगमेन महाप्रलये कार्याणां शक्तिरूपेण तत्रावस्थानाच्छक्तिसमाहारात्मिका मायाऽनन्तक्षोभिताकाल-तत्त्वं जनयति । एष चास्य बिन्दोः परिणामः क्षीरदधि-न्यायेन न सर्वात्मना । अपि तु घृतकीटन्यायेन एकदेशे-नेति मंतव्यम् । ननु श्रीमन्मतङ्गादौ कलाविद्यारागेभ्यो ऽनन्तरमस्य व्यापारः श्रूयते । सत्यं कालादीनां उत्तरोत्तर-स्यैव तत्र प्रवृत्तिक्रमो दर्शितः । अत्र तु सृष्टिक्रम इत्यवि-रोधः । नन्वेषकालो नैयायिकादिभिर्नित्योऽभ्युपगतः । अत आह **भावीति** तस्य भूतादिरूपेण त्रिविधत्वादचैतन्ये सत्यनेक-त्वेनास्यानित्यत्वं सिद्धमिति भावः । केन कार्येणास्य सिद्धि-रित्याह **कलयतीति** । चिरक्षिप्रादिप्रत्ययोपाधिद्वारेण **कल-यतीति** आक्षिपतीत्यर्थः यदाहुः । कालोधिया विभज्यत इति ॥ ४१ ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

किंच ।

नियतिर्नियमनरूपा-
मायातः साप्यनन्तरं भवति ।
नियमयति येन निखिलं
तेनेयं नियतिरित्युक्ता ॥ ४२ ॥

अयमभिप्रायः नियत्यभावे अन्यैरुपार्जितान्यपि कर्माण्यन्ये भुंजीरन । राजानियमाभावे कृष्यादिफलानीव दस्यवः अतस्तन्नियामकत्वेनेयं सिद्धा । न च कर्मणो नियामकत्वम् । तस्य फलजनन एव चरितार्थत्वात् । कार्यान्तरहेतुत्वे प्रमाणाभावात् । अनेकतत्त्वपरिकल्पनाभयप्रसङ्गाच्च । शिवशक्तिर्नियामिकास्त्विति चेत्तन्न । तस्यास्तत्तत्त्वान्तरव्यवधानेनैव भोगविषये कार्यकरणात् । अन्यथा सर्वतत्वाभावप्रसङ्गाच्च ॥

मायातस्तदनुकला-
मलं नृणामेकतस्तु कलयित्वा ।
व्यञ्जयति कर्तृशक्तिं
कलेति तेनेह कथितेयम् ॥ ४३ ॥

मायातस्तदनुकलाभवतीति प्राक्तनेन संबन्धः । सा आत्मनां मलावृतत्वेन भोगासंभवात्तदर्थमेतेषां मलमेकदेशे कलयित्वा क्षिप्त्वा कर्तृशक्तिं व्यनक्ति । शक्तेरेकत्वात्

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ज्ञानक्रियाशक्तिं किंचित्प्रकटयति ततस्तेन कार्येण कलासिद्धिरित्यर्थः ॥ ४३ ॥

ततश्च ।

कालेन नियत्या चा-
प्युपसर्जनतामुपैतया सततम् ।
विदधाति व्यापारान्निज-
मेषा ह्यवनिपर्यन्तम् ॥ ४४ ॥

कला हि भोक्तृस्वरूपोपकारकत्वेनान्तरङ्गत्वात्प्रधानं कालादिस्तु बहिरङ्गत्वादप्रधानमिति भावः ॥ ४४ ॥

एवं च ।

उद्बुद्धकर्तृशक्तेः
पुंसो विषयप्रदर्शननिमित्तम् ।
विद्या तत्त्वं सूते
प्रकाशरूपं कलैवैषा ॥ ४५ ॥

यदुक्तं श्रीमद्रौरवे । कलातत्त्वाद्रागाविद्ये द्वे तत्त्वे संबभूवतुः । अव्यक्तं चेति ॥ ४५ ॥

विषयप्रदर्शननिमित्तत्वमेव प्रकटयति ।

आवरणं भित्त्वैषा
ज्ञानाख्या या स्वकर्मणा शक्तेः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

दर्शयति विषयजातं
करणं सेहात्मनः परमम् ॥ ४६ ॥

ननु कलयैव मलविदारणेन ज्ञत्वमपि प्रदर्शितम् । सत्यम् । अभिव्यक्तस्वरूपमपि तत्करणं विना विषयं ग्रहीतुमशक्तमतश्चेयं विद्यास्वव्यापारेण ज्ञानशक्तेर्विषयग्रहणाक्षमत्वलक्षणमावरणं मलरोधं व्यपोह्य विषयं प्रकाशयति । ननु विषयग्रहणे बुद्ध्यादीनि करणानि सन्ति । सत्यम्— यथा घटादिज्ञानं चक्षुरादिव्यतिरेकेण न संभवति तथा सुखादिविषयग्रहणं करणसापेक्षमत एवेयमात्मनः परममन्तरङ्गकरणम् । तेषां बहिरङ्गत्वात् । एतदुक्तं भवति । अश्वेन पथा दीपिकयामायातीत्यादाविवात्रानेककरणसाध्येऽपि फले विद्यैव परमं करणमिति ॥ ४६ ॥

तदेव दर्शयति ।

बुद्धिर्यदास्य भोग्या
सुखादिरूपा तदा भवेत्करणम् ।
विद्यैवं करणं स्या-
द्विषयग्रहणे पुनर्बुद्धिः ॥ ४७ ॥

मनोधिष्ठितैरिन्द्रियैरुपस्थापितं वस्तुबुद्धिरध्यवस्यति तदध्यवसितं अर्थं पुरुषो गृह्णाति यदाहुः बुद्ध्यद्ध्यवसित-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

मर्थं पुरुषश्चेतयतीति । तत्र च । ग्रहणं ग्राह्यतापन्नमानं बुद्धिः करणत्वेन ग्राहयितुं न क्षमा ततस्तद्ग्रहणे विद्याकरणमिति विद्यासिद्धिः । यदुक्तं तत्त्वसंग्रहे । रविवत्प्रकाशरूपो यदि नाममहांस्तथापि कर्मत्वात् । इत्यादि ॥ ४७ ॥

रागतत्त्वसिद्धिमाह ।

रागोऽभिष्वङ्गात्मा
विषयच्छेदं विनैव सामान्यः ।
पुरुषप्रवृत्तिहेतु-
र्विलक्षणो बुद्धिधर्मेभ्यः ॥ ४८ ॥

अभिष्वङ्गोऽभिलाषः आत्मा कार्यत्वेन यस्य सः रागः । अभिलाषात्मना कार्येण रागतत्त्वसिद्धिरित्यर्थः । ननु विषयगुण एव पुंसोऽभिलाषहेतुरस्तु । अवैराग्यलक्षणो बुद्धिधर्मो वा । तत्किमन्येनात आह । **विषयच्छेदमिति ।** विषयावच्छेदमात्रस्यैवाभिलाषाहेतुत्वे वीतरागाभावप्रसङ्गः । तेषामपि विषयावच्छेदसंभवात् । ततस्तं विनैव पुरुषप्रवृत्तिहेतुरत्र रागः सिद्धः । अवैराग्यस्य च बुद्धिधर्मत्वेन वासनारूपत्वान्न पुरुषोपकारः संभवति । अन्यथा बुद्धेरनन्तवासनायोगेन पुंसो युगपद्विरुद्धानन्तप्रतिपत्तिवैशसप्रसङ्गात् । इत्युक्तमस्माभिर्मृगेन्द्रवृत्तिदीपिकायामिति तत एवावधार्यः । तस्मा-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

दपि विलक्षणः । **सामान्यः** सर्वविषयाभिलाषहेतुरेवायं राग इति ॥ ४८ ॥

ननु पुरुषस्याजडत्वाच्छिववज्जडरूपेषु तत्वेषु तत्वतया गणना न संभवति । तत्वेषु व्यापकत्वाद्रागतत्वानन्तरं शास्त्रेषु पाठोऽप्ययुक्तोऽत आह—

तत्त्वैरेभिः कलितो
भोक्तृत्वदशां यदा पशुर्नीतः ।
पुरुषाख्यतां तदा यं
लभते तत्वेषु गणनां च ॥ ४९ ॥

कलादिपञ्चतत्त्वोपबृंहितोऽणुः भोक्तृत्वेन पुंस्तत्वनिर्देशं याति । न तु परमार्थतः तस्य तत्वं भुवनाधारत्वं च विद्यते । अत एव तद्भुवनानां रागतत्व एव स्थितिरित्युक्तम् । श्रीमन्मतङ्गादौ । तस्य च दीक्षायां प्रकृतितत्वशुध्यनंतरमत्रैव पुंस्त्वमलशुध्यर्थं पाठ इति न दोषः कश्चित् ॥ ४९ ॥

पुरुषस्य हि भोगार्थं
कलैव तस्मात्प्रसूयते व्यक्तम् ।
अनभिव्यक्तगुणत्वा
दव्यपदेश्यं तदव्यक्तम् ॥ ५० ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एवम्भोक्तृत्वं प्राप्तस्य पुंसो भोगार्थं भुज्यन्ते एभिरिति भोगाः भोगसाधनानि गुणादीनि तत्वानि तत्सिद्धयर्थं तत्कारणत्वेनाव्यक्तम् । तस्मात्प्रागुक्ताद्रागतत्वात् । अनन्तरं कलैवोत्पादयति । ननु गुणा एवाव्यक्तं बुद्ध्यादिकारणमिति साङ्ख्याः । तदयुक्तमित्याह । गुणानामचैतन्ये सत्यनेकत्वात्कारणपूर्वकत्वमित्युक्तमतोऽनभिव्यक्तगुणरूपकार्यत्वादेव तदव्यक्तमित्युच्यते । यद्येवं साङ्ख्याभ्युपगतप्रकृतिवन्नित्यमेवेदमस्तु । तन्न, प्रकृतेश्च प्रतिपुरुषं भेदेन जडत्वेत्यनेकत्वात्कार्यत्वं सिद्धम ॥ ५० ॥

ततश्च—

अव्यक्ताद्गुणतत्वं
प्रख्याव्यापारनियमरूपमिह ।
सत्वं रजस्तमोऽपि च
सुखदुःखे मोह इत्यपि च ॥ ५१ ॥

प्रकाशप्रवृत्तिनियमाख्यैस्त्रिभिःकार्यैरेतत्सिद्धम् । किंच ते गुणाः सत्वादयः सुखादिजनकत्वात्क्रमेण सुखदुःखादय उच्यन्ते । एषां च सर्वेषां तत्वानां विस्तरेण साधनम् श्रीमन्मतङ्गादौ द्रष्टव्यम । नात्र विस्तरभयाल्लिखितम् ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

भवति गुणत्रयधी-
विषयाध्यवसायरूपिणी चेह ।
सापि त्रिविधा गुणतः
प्रोक्ता कर्मानुसारेण ॥ ५२ ॥

अयं घट इत्याद्यध्यवसायात्मना कार्येण बुद्धिः सिद्धा। सापि पुंसः कार्यवशात्सत्वादिगुणबाहुल्येन सात्विकादिरूपा जायते । गुणानां सर्वत्र व्यापारदर्शनात् । अस्याश्च बुद्धेः धर्माद्यष्टगुणत्वं सिद्धयादिप्रत्ययभेदश्च श्रीमन्मतङ्गादावव-धेयः ॥ ५२ ॥

तस्याश्च—

स्यात्त्रिविधोऽहङ्कारो
जीवनसंरंभगर्वरूपोऽयम् ।
संभेदादस्य सतो
विषयो व्यवहार्यतामेति ॥ ५३ ॥

आहङ्कारिको हि प्रयत्नात्मकः संरम्भः । यदुक्तम्—संरम्भोऽहं कृतेर्वृत्तिः इति । किंच । प्राणादिवायुप्रवृत्ति-हेतुत्वेन जीवनमपि तद्धेतुकमेव । यदुक्तम् । संरम्भाद्यस्य चेष्टं ते शारीराः पञ्च वायवः इति । तथा गर्वोऽपि ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ग्राह्याध्यवसायाद्बुद्धिकार्याद्भिन्नोऽहमिति ग्राहकाध्यवसायोऽपि तत्कार्यमेवात एतैस्त्रिभिरहंकारसिद्धिः । ततश्चैतत्संबन्धादेव घटमहं जानामीति व्यवहारः । इत्याह संवेदादीति । स च बुद्धेरुत्पन्नः । यदुक्तम् साङ्ख्यैरपि । महतोऽहङ्कार इति ॥

किञ्च—

सात्विकराजस-
तामसभेदेन स जायते पुनस्त्रेधा ।
स च तैजसवैकारिक-
भूतादिकनामभिः समुल्लसति ॥ ५४ ॥

सात्विकादीनामहङ्कारस्कन्धानां तैजसादीनि क्रमान्नामानि भवन्तीत्यर्थः ॥ ५४ ॥

तैजसतस्तत्र मनो
वैकारिकतो भवन्ति चाक्षाणि ।
भूतादेस्तन्मात्रा
ण्येषां सर्गोऽयमेतस्मात् ॥ ५५ ॥

तत्र तेषु मध्यात्तैजसाऽहंकारान्मनोबुद्धीन्द्रियाणि जायन्ते । वैकारिकात्कर्मेन्द्रियाणि भूतादेरपि तन्मात्राणीत्यर्थः । न च तैजसतो मन एव वैकारिकादुभयरूपाणीन्द्रियाणीति व्याख्येयम् । मूलवचनविरोधाद्युक्तिविरोधाच्च । सत्वस्य

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

प्रकाशरूपत्वेन बोधहेतुत्वं रजसः क्रियाहेतुत्वं युक्तम् । उक्तं च श्रीमन्मृगेन्द्रे (श्रोत्रत्वक्चक्षुषी जिह्वा नासा च मनसा सह ।) प्रकाशान्वयतः सत्त्वात्तैजसश्च स सात्त्विकः । वाणी पाणी भगः पायू पादौ चेति रजोद्भवाः । कर्मान्वयाद्रजो भूयाद्गणो वैकारिको त्रयः ॥ ५५ ॥

मनःसिद्धिमाह—

इच्छारूपं हि मनो
व्यापारस्तस्य भवति सङ्कल्पः ।
बुध्यक्षाणि श्रोत्रं त्व-
ग्दृग्जिह्वा च नासा च ॥ ५६ ॥

सङ्कल्पोऽवधानमेकाग्रता । तेन व्यापारेणेच्छारूपं मनः सिध्यतीत्यर्थः अयं तत्राभिप्रायः आत्मनो इन्द्रियार्थसन्निकर्षेऽपि अन्यपरस्य यदधिष्ठानं विना बाह्येन्द्रियाणि न प्रवर्तते तन्मन इति । बुद्धीन्द्रियाण्याह—बुद्ध्यक्षाणीति ॥ ५६ ॥

अथ एषान्ग्राह्यान्विषयानाह—

ग्राह्यास्तेषां शब्द-
स्पर्शौ रूपं रसश्च गन्धश्च ।
इत्येतेषां विषयाः
क्रमेण पञ्चापि पञ्चानाम् ॥ ५७ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अतश्च शब्दादिग्रहणान्यथानुपपत्त्यै वैषां सिद्धिरित्याह ।

शब्दादीनां ग्रहणं
व्यापाराः कीर्तिताः क्रमेणैषाम् ।
वाक्पादपाणिपायू-
पस्थाः कर्मेन्द्रियाणि स्युः ॥ ५८ ॥

न चैषां नियतविषयत्वाद्भौतिकत्वं युज्यते । भूतान्तराणां तद्गुणाना कर्मसामान्यादेश्चक्षुरादीनां ग्रहणदर्शनात् । तदुक्तं सिद्धगुरुणा । भौतिकत्वाच्च नियमे कर्मसामान्ययोस्फुटम् । देवेभ्यो बुद्धयो न स्युः समवाये च देहिनाम् । इति । तत्र देवनाद्योतनाद्देवा इतीन्द्रियाण्युच्यन्ते कर्मेन्द्रियाण्याह । वाक्पादेति ॥ ५८ ॥

अथ व्यापारैः कैरेषां सिद्धिरित्यत आह ।

वचनादानविहरणो-
त्सर्गानन्दाश्च कर्मैषाम् ।
अन्तःकरणं त्रेधा
बुद्धिरहंकारचेतसी चेति ॥ ५९ ॥

विहरणङ्गमनमुत्सर्गो मलापनयनं शेषं सुगमम् । अत एव कर्मेन्द्रियाणि येनेच्छन्ति ते प्रतिक्षिप्ताः । नाकरणाकृतिर्दृश्यते यतः । ननु एवं चेद्भ्रूक्षेपादीनामपि क्रियात्वा-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

दनन्तत्वात्कर्मेन्द्रियाणाम् । तन्न । त्वगिन्द्रियवत्सर्वशरीरव्यापकत्वेनैषामभ्युपगमाद्भूक्षेपादिहस्तादेरेव व्यापार इत्यदोषः । तेषु चान्तःकरणबहिःकरणभेदमाह । अन्तःकरणमिति ॥ ५९ ॥

कर्मेन्द्रियबुद्धीन्द्रिय-
भेदाद्वाह्यं पुनर्भवेद्दशधा ।
तन्मात्रेभ्यः खपवन-
तेजोम्भः क्ष्मेति पञ्चभूतानि ॥ ६० ॥

अथ तन्मात्राणां भूतकारणतयैव सिद्धिरित्याह । तन्मात्रेति । खं च पवनश्च तेजश्च खपवनतेजः शेषं सुगमम् ॥

कानि पुनस्तन्मात्राणीत्यत आह ।

तन्मात्राण्यविशेषाः
शब्दादीनां प्रकीर्तिताः पञ्च ।
भूतानि पञ्च तेभ्यो
भवन्ति तान्येकगुणवृद्धया ॥ ६१ ॥

शब्दस्पर्शादीनां पञ्चनामविशेषाः अनभिव्यक्तविशेषाणि सूक्ष्मरूपाणि पञ्च तन्मात्राणीत्युच्यन्ते । यदुक्तम् । गुणाविशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः । इति । ततश्च सूक्ष्मेभ्यः कारणरूपेभ्यस्तेभ्यः पञ्च भूतानि अस्मदादिबाह्येन्द्रिय-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

परिच्छेद्यगुणत्वात्स्थूलानि जातानीत्याह । भूतानीति । तानि चाकाशादीनि शब्दाद्येकोत्तरगुणानि भवन्ति । शब्दैकगुणमाकाशम । शब्दस्पर्शगुणो वायुः । शब्दस्पर्शरूपगुणोऽग्निः । शब्दस्पर्शरूपरसगुणमम्भः । शब्दादिगन्धान्तपञ्चका पृथिवी । इति । यच्छ्रूयते । शब्दाद्येकोत्तरगुणमवकाशादिवृत्तिमदित्यादि । ननु वैशेषिकादिभिराकाशविशेषगुणः शब्द इष्यते । तन्न । आश्रयादन्यत्राप्युपलब्धेः । यदुक्तमस्य हेतोः प्रत्यक्षागमविरुद्धत्वेन कालात्ययापदिष्टत्वात् इति । तथाह्याकाशे तावत्प्रतिशब्दः श्रूयते वायोः सकमकादिः । अग्नेर्धमधमादिः । चलचलादिकमम्भसि । कटकटादिः पृथिव्यामिति । उक्तं च श्रीमन्मृगेन्द्रे । इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये । अशीतोष्णौ महीवाय्वोः शीतोष्णौ वारितेजसोः । भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा । रूपं त्रिषु रसोऽम्भःसुमधुरः षड्विधः क्षितौ । गन्धं क्षितावसुरभिः सुरभिश्च मतो बुधैः । इति ॥ ६१ ॥

अथैषां व्यापारमाह ।

> अवकाशव्यूहनपाक-
> संग्रहधारणं क्रमादेषाम् ।
> व्यपारा भूतानां
> व्योमादीनां समुद्दिष्टाः ॥ ६२ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अवकाशदानमाकाशस्य व्यापारः । व्यूहनमवयवघटनं वायोः । पाकोऽग्नेः संग्रहोऽवष्टम्भोऽम्भसः । धारणं भूमेः । इति । अत्र चाकाशस्यावकाशमात्रादन्यत्वमनित्यत्वं च अस्माभिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेण दर्शितम् । इति ततोऽवधार्यम् ॥ ६२ ॥

अथैषां दशानां कार्यत्वमिन्द्रियाधारत्वं चाह—

कार्यमिदं दशाधाय-
त्तत्करणैः कार्यते समाविश्य ।
करणान्यसमर्थत्वा-
त्कार्यं संश्रित्य चेष्टन्ते ॥ ६३ ॥

कार्यात्मकमेतत्तन्मात्रभूतात्मकं तत्वदशकं करणैराविश्य चेष्टां कार्यते । तानि चाविभुत्वात्कार्यमधिष्ठायैव चेष्टन्ते । इति तत्वसंग्रहेऽप्युक्तम् । एतत्कार्यं दशधाकरणैराविश्य कार्यते चेष्टाम् । अविभुत्वात्कारणानि तु कार्यमधिष्ठाय चेष्टन्ते । इति । ननु भूतान्येवोभयवादिसिद्धानि इन्द्रियाधाराणि भवन्तु किमन्तर्गडुना निरर्थकेन तन्मात्रपञ्चकेन तदयुक्तम् । स्थूलसूक्ष्मतया तानि इन्द्रियाधाराणि स्थितानीति श्रूयंते । यदुक्तम् श्रीमन्मृगेन्द्रे । तन्मात्राणीह घटवन्महाभूतानि लेपवत् । इति ॥ ६३ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इत्थं तत्वलक्षणमुक्त्वा केषु केषाङ्कथमन्वय इत्यत आह ।

पञ्चानामाद्यानां
चिद्रूपतयान्वयः परेषां तु ।
मायाद्यानां द्वेधा
समानां कीर्तिताः शैवे ॥ ६४ ॥

इयं गौः इयं गौरित्याद्यनुवृत्तिप्रत्ययहेतुरन्वयः । स चास्मिन्शैवे शास्त्रे व्यक्तिव्यतिरिक्तजात्यनभ्युपगमेऽपि कथं चित्साहश्यमात्रेणोच्यते । ततश्चाद्यानां शुद्धानां पञ्चानां तत्वानां सर्वज्ञत्वसर्वकर्तृत्वोपोद्बलनहेतुत्वात् **चिद्रूपतया** । चिदुपकारितयान्वयः । न तु तेषां चैतन्याभ्युपगमो युक्तः । अचेतनत्वस्य प्रागेव साधितत्वात् । परेषां तु अशुद्धानां मायाद्यानां पुंस्त्वान्तानां किंचिज्ज्ञत्वाद्युपोद्बलनहेतुत्वाच्चिदुपकारितया सूक्ष्मदेहद्वारेण गुणसंबन्धात्सुखदुःखमोहजनकतया च द्विविधश्चिदचिदन्वयः ॥ ६४ ॥

अव्यक्तप्रभृतीनां
गुणैश्च सुखदुःखमोहरूपतया ।
अन्वय इह निखिलानां
दशके ह्यन्ते विशेषोऽयम् ॥ ६५ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्रकृत्यादिपृथिव्यन्तानां गुणसंबन्धात्सुखदुःखमोहरूपतयान्वयः । दशकेह्यन्तेति ॥ ६५ ॥

कोऽसावित्याह--

शब्दादिकगुणसाम्ये
तुल्यत्वे चान्वयोऽत्र विज्ञेयः ।
अङ्गाङ्गिभावविहितो
भवति विशेषस्तु केषांचित् ॥ ६६ ॥

तन्मात्रभूतवर्गयोः शब्दादिगुणसाम्ये कार्यशब्दवाच्यतया तुल्यत्वेन च द्विविधोऽन्वयो विज्ञेयः । एषां च सर्वेषां तत्वानां मध्यात्केषां चिद्बिन्दुमायादीनां कारणत्वेनाङ्गितया शक्त्यादीनां कार्यत्वेनाङ्गतया च विशेषो भवतीत्याह--अङ्गाङ्गीति ॥ ६६ ॥

अथ तत्त्वलक्षणमुपसंहरति--

तत्त्वानां स्थितिरेषा
कथिता सृष्टिक्रमेण सर्वेषाम् ।
प्रतिलोमं परिणामा-
न्मायायां तानि लीयन्ते ॥ ६७ ॥

संहारमाह--प्रतिलोममिति । पृथिव्यादेस्तत्त्वगणस्य स्वकारणलयक्रमेण मायायामुपसंहारः ॥ ६७ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

मायायाः परतोऽध्वा
शुद्धः शक्तौ निलीयते सकलः।
परमात्मनि सापि शिवे
तिष्ठत्यविभागमापन्ना ॥ ६८ ॥

शुद्धविद्यादेस्तु शक्तौ महामायाख्यायाम् । **सकलः** कालोपबृंहितोऽध्वा शुद्धः संलीयते । तदुक्तमस्माभिः ।

'गन्धे भूः सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने
शब्दे स्यात्खमहंकृतौ पुनरिमास्तन्मात्रिकास्तामसे ।
कर्माक्षाणि च राजसे सह मनोबुद्धीन्द्रियैः सात्त्विके
बुद्धौ तच्च गुणेषु सा गुणगणो व्यक्ते लयं गच्छति ॥

तद्रागविद्ये च कलां प्रयान्ति
पुंस्त्वं च कालो नियतिः कला च ।
मायासु विद्येशमसौ स देशं
स शक्तिमेषा शिवमेष बिन्दुः ॥ इति। तत्र च शिव-

शब्देन शान्तिकलामस्तकस्थं शान्त्यतीतभुवनमुच्यते। तदानीं च। **परमात्मनीति** । सा महामाया अपि शब्दान्मलावृतात्मनि चितां माया च शिवे निमित्तभूते अधिष्ठातरि सति परं केवलमात्मन्येव कार्यरूपे विभागरहिता कारणस्वरूपैव तिष्ठति। न तु शिवे अविभागमापन्ना समवायं प्राप्नो-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

तीति व्याख्येयम् । तस्याश्रितसमवाये परिणामित्वादिदोष-प्रसङ्गात् । तदुक्तं श्रीमन्मृगेन्द्रे । स्वापेऽप्यास्ते बोधयन्बोध-योग्यान्रोध्यान्रुद्धन्पाचयन्कर्मिकर्म । मायाशक्तीर्व्यक्तियो-ग्याः प्रकुर्वन्पश्यन्सर्वं यद्यथावस्तुजातम् ॥ इति । तच्च सात्मकमाश्रित्य विश्रमायावतिष्ठते । भविनां भवखिन्नानां सर्वभूतहितो यतः ॥ इति ॥

ततश्च—

मायापुरुषः शिव इ-
त्येतत्त्रितयं महार्थसंहारे ।
अवशिष्यते पुनस्त-
त्प्रवर्तते पूर्ववत्सृष्टौ ॥ ६९ ॥

अयं त्रैलोक्यान्तस्य मध्यमस्य च गुणान्तस्य प्रलयस्य सद्भावान्महाप्रलयो ह्यशेषसंहारः तत्र विद्येशानामपि मोक्ष-प्राप्तेः । मायादिकं त्रितयमवशिष्यते । तत्र मायाशब्देन [1]तन्त्रोच्चारान्मायामहामायात्मकमुपादानद्वयमुच्यते । पुरुष-शब्देन जात्येकवचनेन मलयुक्ताः सर्वे बद्धात्मानः शिव-शब्देन समवेतशक्तियुक्तः शिवः मुक्तात्मानश्च । पुनः संहा-रान्ते तच्छिवादिवस्तुसृष्ट्यर्थं प्रागुक्तवत्प्रवर्तते ॥ ६९ ॥

1. मन्त्रोच्चार इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अथास्य महासंहारस्य प्रयोजनमाह—

संसारे खिन्नानां
निखिलानां प्राणिनां प्रभुः कृपया ।
कुरुते महार्थसंहृति-
मेतेषामेव विश्रान्त्यै ॥ ७० ॥

कर्मविपाचनहेतोः
पशुदयया पुनरपीह परमेशः ।
सृष्टिं विधाय तेषां
कर्म विपाचयति देहभृताम् ॥ ७१ ॥

विश्रमायाखिलात्मनां कर्मणां च पाकार्थं उपलक्षणत्वाद-स्यानवरतमनन्तशरीरादिजननेनापचितशक्तेर्मायायाश्च साम-र्थ्योत्पादनार्थं संहार इत्यर्थः । सृष्टिरपि मोक्षायेत्याह— पशुदययेति । कर्म विपाचयति विशेषेण पाचयति प्रागा-र्जितानि कर्माणि पाकक्रमेण कर्मार्थं भोग्यतयोपस्थापयती-त्यर्थः ॥ ७१ ॥

ततश्च क्रमेण मलपरिपाके जाते सति—

भोगेन कर्मनाशं
विधाय दीक्षाख्यया शक्त्या ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मोचयति पशूनखिला-
न्करुणैकनिधिः सदा शम्भुः ॥७२॥

मलपरिपाके सति कर्मणां युगपत्पाकात् दीक्षाख्यया स्वशक्त्या आचार्यव्यापाराभिव्यक्तया केवलया वा । युगपदनेकभोगभोजनात्मककर्मनाशं विधाय मलादिभ्यः पशून्मोचयतीत्यर्थः । यदुक्तं श्रीमत्किरणे । अनेकभाविकं कर्मदग्धबीजमिवाणुभिः । भविष्यदपि संरुद्धं येनेदं तद्धि भोगदम् । अत एव सद्यो निर्वाणदीक्षायामारब्धकार्यस्य वर्तमानशरीरारम्भकस्य कर्मणोऽपि क्षय इति सिद्धम । दीक्षाया च नैष्ठिक्यादिको भेदः श्रीमन्मतङ्गादेरवधेयः ॥ ७२ ॥

यद्येवं शरीरादेः कथं न तत्त्वतया परिगणनमत आह—

आप्रलयं यत्तिष्ठति
सर्वेषां भोगदायिभूतानाम् ।
तत्तत्त्वमिति प्रोक्तं
न शरीरघटादितत्वमतः ॥ ७३ ॥

अतः साक्षात्परंपरयाभावाभोगदायकमाप्रलयावस्थायि च यत् तत्तत्वमित्युक्तमत एवास्माभिः संहारक्रमेण तत्वानि प्रदर्शितानि । यथा ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

"भूवार्यग्निमरुत्खगन्धरसरूपस्पर्शशब्दान्भगं
पायूपादकरास्यनासिरसना हक्त्वक्छ्रुतिर्मानसम् ।
गर्वं धीगुणमन्त्ररागपुरुषान्विद्यानि मत्यौ कलां
कालं मोहकबोधकेश्वरसदेशच्छक्तिमीडे शिवम् ॥"

इति । अत्र च रागपुरुषानिति क्रमवैपरीत्येन पुंसो नाध्वत्वमिति दर्शितम् ॥

अकृतस्य करणं कृतस्य परिवर्धनं च बुद्धिधर्म इति ।

तत्त्वं भवति ततो
यत्कारणमापूरकं च तत्वस्य ।
कथिता व्यवस्थितिरियं
निखिलानामेव तत्वानाम् ॥ ७४ ॥

अथ प्रकरणमुपसंहरति । कथिता व्यवस्थितिरिति ॥

केनेदं प्रकरणमित्याह—

तत्वानामपि तत्वं
येनाखिलमेव लीलया कथितम् ।
श्रीभोजदेवनृपति-
र्व्यदधत्तत्वप्रकाशं सः ॥ ७५ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

तत्वानां प्रकाशं ज्ञानं तत्वानां तत्वस्वरूपं येन कथितं ज्ञापितमित्यर्थः ॥ ७५ ॥

तदेव प्रपञ्चयति ।

यस्याखिलं करतलामलकक्रमेण
देवस्य विस्फुरति चेतसि तत्वजातम् ।
श्रीभोजदेवनृपतिः स शिवागमार्थं
तत्वप्रकाशमसमानमिदं व्यधत्त ॥ ७६ ॥

यः शास्त्रेषु शिवोदितेषु परमं व्याख्यातृभावं गतः
सामान्येषु पदादिकेषु च सुधी स्वाध्यायशिक्षोल्बणः ।
तेनाघोरशिवेन शैवतिलकैः संप्रार्थितेनादरा-
त्संक्षेपेण गुरूत्तमेन विवृतस्तत्वप्रकाशः स्फुटम् ॥

इति लक्षद्वयाध्यापकश्रीमदघोरशिवाचार्यविरचिता
तत्वप्रकाशिकावृत्तिः समाप्ता ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

॥ श्रीः ॥

॥ शिवाभ्यां नमः ॥

॥ तत्वसंग्रहः ॥

शिवत्वं निर्मलं यस्य शश्वद्विश्वविलक्षणम् ।
तमहं सर्वदं वन्दे श्रीमदभ्रसभापतिम् ॥

पदवाक्यप्रमाणज्ञः सद्योज्योतिर्गुरूत्तमः ।
साक्षादिव शिवोऽस्माभिरलक्ष्यमतिवैभवः ॥

तत्वसंग्रहचन्द्रस्य प्रकाशाय वितानिता ।
श्रीनारायणकण्ठेन बृहट्टीकाशरन्निशा ॥

तथापि खिन्नबुद्धीनां बृहट्टीकाप्रविस्तरे ।
हिताय लघुटीकात्र मयेयमुपरच्यते ॥

तत्र तावदत्रभवानाचार्यः परमशिवप्रणामपूर्वकं प्रकरणकरणं प्रतिजानीते ॥

चिदचिन्नेतारमजं
सर्वज्ञं शङ्करं प्रणम्याहम् ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

मन्दमतिबोधहेतो-
स्तत्वानि वदामि संक्षेपात् ॥ १ ॥

चितां बद्धात्मनां अचितां च बिन्दुमायातत्कार्याणां नेतारं अधिष्ठितारं साक्षात्परम्परया च शुद्धाशुद्धजगदुपादानेनात्मनां यथार्हं शुद्धाशुद्धभोगप्रदमित्यर्थः । अतश्च जगतः सन्निवेशादिमत्वेन कार्यत्वात्तत्कर्तृतयेश्वरसिद्धिरिति भावः । एतेन प्रकृतिपुरुषकर्मेश्वरवादिनोऽपि निरस्ताः, प्रकृतिकर्मणोरचेतनत्वात् । पुरुषस्य च समलत्वेनास्ववशत्वात् । अजं नित्यनिर्मलत्वात् । शरीरादियोगात्मनापि जन्मना रहितम् । अनेन चास्य नित्यत्वं सिद्धम् । अस्य हि जगत्कर्तुरनित्यत्वे जन्मादियोगित्वे वा चेतनत्वमनवस्थानं च स्यात् । किं च सर्वज्ञं मलराहितत्वात्सर्वकर्तृत्वाच्च । इदं चात्राकूतं नास्य ज्ञानं नैयायिकादीनामिव मनःसंयोगाद्यपेक्षं अपि तु ज्ञानं स्वभाव एव तस्य च ज्ञेयकार्याद्युपाधिभेदादौपचारिकमानंत्यं। यच्छ्रूयते । तदेकं विषयानन्त्याद्भेदानन्त्यं प्रपद्यते । कर्तृत्वं तदभिन्नत्वात्तद्वदेवोपचारतः ॥ इति । शं सुखं अप्रेर्यतारूपं सर्वज्ञत्वसर्वकर्तृत्वात्मकं स्वसाम्यं आत्मनां करोतीति शङ्करः । अनेन चास्य मोक्षप्रदत्वमाह— लक्ष्यपदं चैतत् तमेवं भूतं भगवन्तं प्रणम्य कायवाङ्मनोभिः

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ग्रहीभूय तत्त्वानि पृथिव्यादीनि संक्षेपाद्वदामि । तत्त्वलक्षणमस्याभिधेयमित्यर्थः । किमर्थमस्य प्रारम्भोऽत आह—मन्दमतीति । अयमाशयः मतङ्गाद्युक्तस्य तत्त्वलक्षणस्य अतिविस्तृतत्वान्मन्दमतीनां तदवधारणमशक्यम् । ततस्तेषां संक्षेपेण तत्त्वबोधार्थमस्यारम्भ इति । तत्त्वज्ञानस्य परंपरया परापरमोक्षसाधनत्वात् परमपुरुषार्थात्मकं प्रयोजनमप्यत्र सूचितम् । ततश्च तत्त्वज्ञानप्रकरणयोर्ज्ञाप्यज्ञापकलक्षणस्तत्त्वज्ञानमोक्षयोरुपायोपेयलक्षणश्च संबन्धः सिद्धः । गुरुसंप्रदायात्मकमपि संबन्धं वक्ष्यति । भगवानुग्रज्योतिः सर्वज्ञोऽयमनुजग्राहेति । अनुग्रहस्योपलक्षणत्वात्परमशिवात्प्रभृति आत्मान्तमविच्छिन्नशास्त्रसंप्रदायतः सिद्धान्तार्थः प्रतिष्ठित इति भावः ॥ १ ॥

इत्थं तत्त्वव्याख्यां प्रतिज्ञाय । "व्युत्क्रमेणोपनेयोऽसौ शिवाय गमनं प्रति ।" इति श्रीमत्स्वायंभुवश्रुतेः तेषां च संहारक्रमेणैव दीक्षायां शुद्धिरिति सूचयन्संहारक्रमेणैव पञ्चभूतानि तावदाह—

क्षितिजलशिखिपवनाम्बर-
भूतान्येषां क्रमेण वृत्तानि ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

धारणसंग्रहपाक-
व्यूहो दानं च तदवकाशस्य ॥ २ ॥

क्षितिजलशिखिपवनाम्बराण्येव भूतानीत्यर्थः । एषां च पृथिव्यादीनां धारणादिभिः कार्यैः सिद्धिरित्याह— **एषां क्रमेणेति** । तत्र संग्रहोऽवष्टंभः व्यूहो अवयवसंघट्टनं अवकाशस्य आस्पदस्य दानं आकाशवृत्तिः । ततो अवकाशदानात्मना कार्येण आकाशसिद्धेस्तदभाववादिनश्चार्वाकास्तत्प्रत्यक्षवादिनो मीमांसकाश्च प्रतिक्षिप्ताः । न चास्य नैयायिकादिभिरिव नित्यत्वमिष्यते । वक्ष्यमाणवत्तन्मात्राकार्यत्वात् भुवनाधारत्वश्रुतेश्च । व्यूहोऽपि वायुकार्याणामुपलक्षणम् । यदाहुः । स्पर्शशब्दधृतिकम्पालिङ्गो वायुरिति । किंच । गन्धो रसोऽथ रूपं स्पर्शः शब्दो मही गुणाः पञ्च । तोयादीनामेते पूर्वं पूर्वं विहाय परिपाट्याः । तदुक्तं मृगेन्द्रे । इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये । अशीतोष्णौ महीवाय्वोः शीतोष्णौ वारितेजसोः । भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा । रूपं त्रिषु रसोऽम्भःसु मधुरः षड्विधः क्षितौ । गन्धः क्षितावसुरभिः सुरभिश्च मतो बुधैः । इति । अत एवाश्रयादन्यत्रोपलब्धेराकाशैकगुणःशब्द इति यद्वैशेषिकादि-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

भिरुक्तम्, तदयुक्तम् । तस्य हेतोः प्रत्यक्षागमबाधितत्वेन कालात्ययापदिष्टत्वात् । तथा हि प्रत्यक्षेणाकाशे प्रतिशब्दः श्रूयते । वायौ शकशकादिः । अग्नौ धमधमादिः । जले छलछलादिः । पृथिव्यां कडकडादिः । किं च भेर्याद्याश्रयेष्वपि शब्दा उपलभ्यन्त इत्यादि विस्तरेणोक्तमस्माभिर्मृगेन्द्रवृत्तिदीपिकायामिति तत एवावधार्यम् । येषां च भूतानामस्मदादि बाह्येन्द्रियपरिच्छेद्यगुणत्वाद्घटादिवत्कारणपूर्वकत्वासिद्धेस्तत्कारणं तन्मात्रपञ्चकं सिद्धमित्याह—

तद्भूतसमानगुणं
कारणमापूरकं च तस्यैव ।
तन्मात्रं भूतस्य
ह्ययं विशेषो विशेषरहितं तत् ॥ ३ ॥

तद्भूतसमानगुणं तन्मात्रान्तस्य भूतस्य कारणमुपादानमापूरकं च पोषकं च भवतीति शेषः । यदाहुः । अकृतस्य करणं कृतस्य परिवर्धनं च प्रकृतिकर्मेति । ततश्च गन्धादिपञ्चगुणात्मकं गन्धतन्मात्रं भूमेः कारणं रसादिचतुर्गुणरूपं तु रसतन्मात्रं जलस्येत्येवमन्यत्स्पष्टम् । अनेनैतेषां परमाणुरूपतामभिदधाना नैयायिकादयः प्रतिक्षिप्ताः । तेषामचैतन्यत्वे सत्यनेकत्वात् मूर्तत्वाच्च घटादिवत्पांस्वादिवद्वा कार्य-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

त्वाऽव्यभिचारात् ततश्च तन्मात्रादिद्वारेण मायैव परमकारणमिति वक्ष्यामः। यद्येवं समानगुणत्वाद्भूततन्मात्रयोः को विशेषोऽत आह। तन्मात्रं भूतस्येति। यथा हि पृथिव्यादिभूतगता गन्धादयो गुणाः प्रोक्तवाद्विशिष्टा उपलभ्यन्ते। नैव तत्कारणेषु तन्मात्रेषु ततश्च सूक्ष्मत्वादविशिष्टगुणमात्ररूपात्तन्मात्रवर्गाद्भूतवर्गस्य स्थूलत्वाद्विशिष्टगुणयोगित्वं विशेषः। अत एवैषां तन्मात्रसंज्ञाः। यच्छ्रूयते। गुणाविशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः इति ॥ ३ ॥

अथैषां भूततन्मात्राणां कार्यशब्दवाच्यत्वमिन्द्रियाधारत्वं चाह--

एतत्कार्यं दशधा करणै
राविश्य कार्यते चेष्टाम्।
अविभुत्वात्करणानि तु
कार्यमधिष्ठाय चेष्टन्ते ॥ ४ ॥

एतानि च स्थूलसूक्ष्मरूपेण इन्द्रियाधाराणि स्थितानीत्युक्तम् मतङ्गे। तन्मात्राणीह घटवन्महाभूतानि लेपवत्। इति ॥ ४ ॥

अथ कर्मेन्द्रियसिद्धिमाह--

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

वचनादानोत्सर्गा-
नन्दागमनेषु कर्मकरणानि ।
श्रोत्रस्पर्शनदर्शन-
जिह्वाघ्राणानि बुद्धिकरणानि ॥ ५ ॥

वाक्करपायुप्रजननचरणसमाख्यानि करणानि । उत्सर्गो मलविरेकः, वागादीनि कर्माक्षानि, वचनाद्यासु क्रियासु करणानि सिद्धानीत्यर्थः । अतश्च कर्मेन्द्रियाभाववादिनो नैयायिकादयः प्रतिक्षिप्ताः । नाकरणाकृतिः संभवति यतः । ननु भ्रूलतोत्क्षेपादीनामपि क्रियात्वात् कर्मेन्द्रियानंत्यप्रसङ्ग इति चेत्तन्न । तेषां त्वगिन्द्रियवत्सर्वशरीरव्यापकत्वेनाभ्युपगमात्, हस्तादेरेव भ्रूक्षेपणादिव्यापारस्तत्तत्संज्ञाकृतस्तत्तदिन्द्रियशक्तीनां तत्र तत्र विशेषाधिष्ठानादित्यविरोधः । बुद्धीन्द्रियाण्युच्यन्ते । **श्रोत्रस्पर्शनेति**, स्पृश्यतेनेनेतिस्पर्शनं त्वगिन्द्रियमेव दर्शनमपि चक्षुरेव ॥ ५ ॥

अथ कैर्व्यापारैरेषां सिद्धिरित्याह—

प्रत्येकं शब्दादि-
ष्वेषामालोचनं वृत्तिः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इति दशधा करणं बहि-
रिच्छासंरम्भबोधवृत्यन्यत् ॥ ६ ॥

अन्तःकरणं त्रिविधं
चित्ताहंकारबुद्धिनिर्वाच्यम् ।
उत्पत्तिरहंकारा-
च्चित्तबहिष्करणभूतयोनीनाम् ॥ ७ ॥

एषां श्रोत्रादीनां यथाक्रमं शब्दस्पर्शरूपरसगन्धेषु विषयेषु **आलोचनं** ग्रहणम् । प्रत्येकमसाधारणं **वृत्तिः** । शब्दादिग्रहणान्यथानुपपत्या तेषां सिद्धिरिति भावः । इत्थं बहिः दशप्रकारं बाह्येन्द्रियं ज्ञेयमिति शेषः ॥ अन्तःकरणसिद्धिमाह । **अन्तःकरणमिति** । बाह्यकरणादन्यदन्तःकरणं त्रिविधम् । मनोबुध्यहंकाराख्यम् । तेषां च क्रमादिच्छादयो व्यापारा इत्याह— **इच्छासंरम्भबोधवृत्तीति** । तत्रेच्छाशब्देन संकल्पाख्यमवधानमेकाग्रतापरपर्यायमुच्यते । तच्च द्विक्रियात्मकत्वात् बुध्यहङ्कारकार्याद्ग्राह्यग्राहकपरामर्शात्मनो भिन्नं तयोः प्रत्ययरूपत्वादतो यस्यैतत्कार्यं तन्मन इति मनःसिद्धिः तच्च मनःसङ्कल्पेनान्तरेण बाह्येन्द्रियाधिष्ठानेन च द्विधाधिकारीत्युक्तं मतङ्गे । द्विधाधिकारि तच्चित्तं भोक्तुर्भोगोपपादकम् । बहिःकरणभावेन स्वोचितेन यतः सदा ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इन्द्रियाणां तु सामर्थ्यं सङ्कल्पनात्मवर्तिना । करोत्यन्तःस्थितिं भूयस्ततोन्तःकरणं मन इति । मृगेन्द्रेऽपि । देवप्रवर्तकं शीघ्रचारिसंकल्पधर्मि च । इति । तत्र च देवशब्देनेन्द्रियाण्युच्यन्ते । इन्द्रियाधिष्ठातृत्वं च तत्रैव साधितम् । आत्मेन्द्रियार्थनैकट्ये सर्वदैवा प्रवृत्तितः । प्रवृत्तिकारकास्तित्वं युक्तितोऽध्यवसीयते । इति । ततश्चाविभुत्वात्प्रत्यात्मानियततयानेकत्वाच्च कार्यत्वं मनसः । तथा संरम्भः प्रयत्नात्मकोऽहङ्कारकार्य एव । यदुक्तं—संरम्भोऽहंकृतेर्वृत्तिरिति । स च ज्ञानशक्त्याश्रयभूतया बोधाध्यवसायवत्क्रियाशक्त्याश्रयभूतया भवति । अयमेव प्राणादिरूपस्यान्तरस्य वायोः प्रवृत्तिनिमित्तम् । यदाहुः । प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः । इति । किं च ग्राह्यपरामर्शात्मनो बुद्धिकार्यात्प्रतिक्षणमनेकरूपस्यात्यन्तविलक्षणस्य एकरूपस्याहमिति ग्राहकपरामर्शस्य यत्करणं सोऽहंकार इत्यहंकारसिद्धिः । न चायं तत्वान्तराणां कार्यः तेषां स्वकार्यैरेव सिद्धेः । कार्यान्तरहेतुत्वे प्रमाणाभावात् । अनेकतत्त्वपरिकल्पनाभावप्रसङ्गाच्च । एवं बोधो ग्राह्याध्यवसायो बुद्धिवृत्तिः । तथा हि । द्विविधोऽत्र बोधोऽध्यवसायात्मकोऽनध्यवसायात्मकश्च । तत्र योऽनध्यवसायात्मकः सर्वदा ग्राहकरूपेणैव भासमान आत्मस्वभाव एव यस्त्वध्य-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

वसायरूप: स उत्पन्नत्वोपपत्त्या अनित्यत्वेनावभासमानो न पुंसस्वभाव:। नित्यस्यानित्यस्वभावत्वायोगात् न च नित्योऽसावनुभूयते। अतोऽयं यस्य स्वभाव: सा बुद्धि:। तदाहु:। अस्ति ह्यालोचनाज्ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्। तत: परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यथा। बुध्यावसीयते सापि प्रत्यक्षत्वेन संमता इति। किं च। धर्माद्याश्रयतयापि बुद्धिसिद्धि: श्रूयते। भावाबुद्धिगुणा धर्मज्ञान वैराग्यभूतय:। सात्विका व्यत्ययेनैते रागमुत्सृज्य तामसा:। इति। अयमभिप्राय: कर्मणो धर्माधर्मात्मनोनुष्ठानरूपस्य तत्क्षणमेव नाशात्। तज्जन्योऽपूर्वाख्य: संस्कार: कालान्तरफलश्रुत्यन्यथानुपपत्त्या कल्प्यते स च नात्मनि संभवति अविकारित्वात्। कर्मणां च कृष्यादीनामात्मसंस्कारकत्वादृष्टेरपि तु जड एव यत्र तानि संस्कारं कुर्वन्ति साधर्माद्यष्टगुणा बुद्धिरिति। एवं ज्ञानादिसंस्कारेऽपि वाच्यम्। ते च भावा: सिध्यादिप्रत्ययभेदेन शतत्रयसंख्या भवन्तीत्युक्तम् अन्यत्र। इत्थं करणवर्गं प्रसाध्य तत्र तेषां कस्मादुत्पत्तिरित्याह— **उत्पत्तिरहंकारादिति**। तत्र मनसो बुद्धीन्द्रियाणां च सात्विकात्तैजसाख्यादहंकारस्कन्धादुत्पत्ति:। कर्मेन्द्रियाणां तु राजसाद्वैकारिकाख्याद्भूतयोनीनां च तन्मात्राणां तामसाद्भूतादिसंज्ञादेवं

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

त्रिविधादहंकारादेषामुत्पत्तिः । यदुक्तम् मृगेन्द्रे । श्रोत्रत्वक्चक्षुषी जिह्वा नासा च मनसा सह । प्रकाशान्वयतः सत्वात्तैजसश्च ससात्विकः । वाणी पाणी भगः पायुः पादौ चेति रजोद्भवाः । कर्मान्वयाद्रजोभूयाद्गणो वैकारिको त्रयः । शब्दस्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । गुणाविशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः । प्रकाशकर्मकृद्वर्गवैलक्षण्यात्तमोद्भवाः । प्रकाश्यत्वाच्च भूतादिरहंकारेषु तामसः । इति । अतश्च बुद्धीन्द्रियद्वारेण तैजसेनाहंकारेणात्मनो ज्ञानशक्तिरुन्मील्यते । वैकारिकेनापि कर्मेन्द्रियद्वारेण क्रियाशक्तिरुन्मील्यते । तस्यामलिनत्वात्तदपेक्षया यतः । एषां च सात्विकादिव्यवहारः सत्वादिगुणबाहुल्यान्नामिश्रं परिणमत इति न्यायान्न त्वेकजनकं भवति ॥ ६ ॥ ७ ॥

महतोऽहङ्कारस्य तु
महतश्च गुणत्रयाज्जन्म ।
सत्त्वं रजस्तमश्च-
प्रख्याव्यापारनियमरूपाश्च ॥ ८ ॥

अहंकारस्य तु बुद्धेर्जन्म बुद्धेश्च गुणतत्वात् । तदुक्तं सांख्यैरपि । प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गुणतश्च षोडश कः । इति । ननु वैशेषिकादिभिर्नियतविषयत्वाद्भौतिका-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नीन्द्रियाणीष्यन्ते । तदयुक्तम् । चक्षुरादिना भूतान्तरगतस्य गुणस्य भूतान्तराणां कर्मसामान्यादेश्च ग्रहणात् । तदुक्तं भोगकारिकासु । भौतिकत्वाच्च नियमे कर्मसामान्ययोस्फुटम् । देवेभ्यो बुद्धयो न स्युः समवाये च देहिनामिति । यदुक्तं कारकत्वाविशेषेऽपि नैषां विषयनियतस्वभावभेद इति । तदप्युत्पत्तिभेदादिक्षुविकाराणां गुळखण्डशर्करादीनामिव भविष्यतीति न किञ्चिदेतत् । अथ गुणतत्वमाह । **सत्त्वं रजस्तम इति** । प्रकाशप्रवृत्तिनियमाः सत्वादीनां क्रमाद्व्यापारा इत्यर्थः । एषां च सूक्ष्मदेहद्वारेण समस्तमायाकार्येषु व्यापकत्वमस्ति । प्रकाशादयश्चान्यासामप्रधानानां गुणवृत्तीनामुपलक्षणम् । तथा हि स्थैर्यधैर्यादयोऽपि सत्वस्य वृत्तयः । क्रौर्यशौर्यादयोऽपि रजसस्तमसस्तु अरतिमान्द्यादयोपीत्युक्तम् मतङ्गादौ ॥ ८ ॥

ननु गुणा एव प्रकृतिरिति साङ्ख्याः तदयुक्तमित्याह ।

त्रय एव ते गुणास्त्विह
येषां संभूतिरव्यक्तात् ।
अविभागो हि गुणाना-
माधारे क्ष्मादिभोगवदवश्यम् ॥ ९ ॥

अयमभिप्रायः गुणानामचैतन्ये सत्यनेकत्वात् यतो घटा-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

दिवत्कारणपूर्वकत्वं ततस्तेषामव्यक्तादेव संभूतिरित्येव शब्दो भिन्नक्रमः । प्रकृतिकार्यत्वमेव प्रपञ्चयति । आधारेति । क्ष्मादिभागानां घटादिरूपाणां यथा पृथिव्यात्मके आधारेऽवश्यमविभागो भवति । एवं सत्वादीनामपि गुणभागानां कस्मिंश्चिदाधारेऽवश्यमविभागो विज्ञेयस्ततस्तस्याविभागस्य य आधारस्तदव्यक्तमित्यव्यक्तसिद्धिः । तदुक्तं मृगेन्द्रे । ततः प्राधानिकं तत्वं कलातत्वादजीजनत् । सप्तग्रन्थिविधानस्य यत्तद्गौणस्य कारणम् । इति ।

अनन्तरं रागतत्वसिद्धिमाह—

यज्जनिताभिष्वङ्ग
भोग्यायनरिक्तियास्सरागोऽत्र ।
भोग्यविशेषे रागे
न हि कश्चिद्वीतरागः स्यात् ॥ १० ॥

ननु मतङ्गादौ प्रकृतिरागयोर्मध्ये पुरुषतत्वं श्रूयते । तत्सत्यम् । तस्य तु चेतनत्वान्नित्यत्वाच्च भुवनाद्याधारत्वेनाध्वत्वं न संभवति । तथा हि । कलादिपञ्चकयुक्तस्य भोक्तृत्वे न पुंस्त्वमलेनानात्मादावात्माभिमानरूपेण योग इति दीक्षायां तत्स्थान एव तच्छुध्यर्थमागमेषु प्रक्रमितत्वादूर्ध्वं पुरुषतत्वतया पाठश्श्रूयते अतश्चाचार्येण तद्वर्णनमुपेक्षि-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

तम् । मायातत्त्वानन्तरं तु पशुस्वरूपं वक्ष्यति । अस्मिन्नरि पुरुषे येन जनिताभिलाषे भोग्यवस्त्वादानाय प्रवृत्तिर्भवति सोऽत्र शैवे शास्त्रे रागो ज्ञेयः । अभिलाषात्मना कार्येण रागतत्त्वसिद्धिरित्यर्थः । ननु अवैराग्यलक्षणो बुद्धिधर्म एवाभिलाष हेतुरिति सांख्याः । तदयुक्तम् । वासनारूपस्याकार्यकरत्वात् । तस्य वा कार्यकरत्वे बुद्धेः सर्वदानंतवासनायोगेन पुंसो युगपद्विरुद्धानन्तप्रतिपत्तिवैशसप्रसङ्गाच्च । प्रत्ययरूपस्यापि भोग्यत्वान्नाभिलाषहेतुत्वम् । ननु विषयगुण एवाभिलाषहेतुरस्तु । तन्न । विषयसंनिधानमात्रादेव सर्वस्य सरागतापत्तेः वीतरागाभावप्रसङ्गात् । तस्माद्वीतरागदर्शनान्यथानुपपत्त्याभिलाषहेतुर्ग्राहकगतो रागोऽभ्युपगन्तव्यः । एतदेवाह । **भोग्यविशेष इति** । न च कर्मैव रञ्जकं भविष्यतीति वाच्यम् । तस्य फलजनन एव चरितार्थत्वात् । अनेकतत्त्वपरिकल्पनाभावप्रसङ्गाच्च । ननु मायाया मोहकस्वभावो रागोऽस्तु तन्न । यतो न मायायाः साक्षान्मोहकत्वं अपि तु कार्यद्वारेणैवेत्यदोषः ॥

वीतरागश्च प्रत्यक्षसिद्ध एवेत्याह—

यदुपहितेऽभिष्वङ्गो
महति पुनस्तदुपधौ स नो दृष्टः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तस्मान्नो वाच्यमिदं
स विशेषो नास्ति वीतराग इति ॥

येन स्त्र्यादिना विषयेण उपधाने सत्यपि सोऽभिलाषो न दृष्टः । तस्मात्प्रत्यक्षदृष्टत्वादनभिलाषलक्षणः स विशेषो वीतरागो नास्तीति न वाच्यम् ।

विद्यातत्त्वसिद्धिमाह—

करणेन येन भोग्यं करोति
पुरुषः प्रचोद्य महदादीन् ।
भोग्ये भोगं च पुनः सा
विद्यात्तत्परं करणम् ॥ १२ ॥

येन करणेन बुध्यहंकारादिकरणग्रामं प्रचोद्य पुरुषो भोग्यं निष्पादयति । तस्मिंश्च भोग्ये भोगं च करोति । तद्विद्याख्यं करणमात्मन इति सन्निकृष्टत्वात्परमित्युच्यते । एतदुक्तं भवति । अश्वेन पथा दीपिकया यातीत्यादावित्रानेककरणसाध्येऽपि फले विद्यैव परमं करणम् । यतस्तयैव भोग्यं जानाति इति ।

किं पुनरत्र भोग्यं को वा भोग इत्यत आह ।

बुद्धिर्विषयाकारा-
सुखादिरूपा समासतो भोग्यम् ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

भोग्ये भोगो भोक्तु-
श्चिद्व्यक्तिर्भोग्यनिर्भासा ॥ १३ ॥

अध्यवसितस्रक्चन्दनादिविषया अत एव सुखदुःखमोहाध्यवसायरूपा बुद्धिरेव पुंसः समासतः संक्षेपेण भोग्यं तस्या एव साक्षाद्भोग्यत्वात्। विषयास्तु बाह्यास्तत्साधनत्वेन परम्परया भोग्या उच्यन्ते। तथा हि भोग्यं वस्तु हि चित्ताधिष्ठितं बुद्धीन्द्रियबृन्दं विद्यायाविषयत्वेनोपस्थापयति। तच्चाहंकारवृत्यात्मपरामर्शपूर्विकया बुध्याध्यवसितमर्थं पुरुषो गृह्णाति। यदाहुः बुध्यध्यवसितमर्थं पुरुषश्चेतयतीति। बुध्यादीनां सन्निहितासन्निहितविषयोपस्थापकत्वेनोपयोगः। न तु संविज्जनकत्वेन। उपस्थापितविषयं बुध्यहंकारेन्द्रियभेदैः सह या विवेचयति। सा विद्येति विद्यासिद्धिः। ततश्च भोक्तुः अनुसंधातुः पुरुषस्य। भोग्ये बुध्याख्ये सुखाद्यध्यवसायरूपे। सुख्यहं दुःख्यहमिति। भोग्यनिर्भासा। भोग्योपरक्ता चिद्व्यक्तिः। संविदुद्भवः स भोगो मन्तव्यः। यदुक्तं स्वायंभुवे। भोगोऽस्य वेदनापुंसः सुखदुःखादिलक्षणा। इति। ततश्चाध्यवसायस्मृतिप्रतिभाप्रत्ययभेदभिन्नाबुद्धिरपि यया विद्यते सा विद्या तच्च परं करणमित्युक्तम् ॥ १३ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ननु बुद्धिरेव प्रकाशरूपत्वात् सूर्यादिवद्विषयानध्यवसायेन प्रकाशयिष्यति स्वात्मानमपि ग्राहयिष्यति तत्किमन्येन विद्याख्येन करणेनात आह—

रविवत्प्रकाशरूपो
यदि नाम महांस्तथापि कर्मत्वात् ।
करणान्तरसापेक्ष-
श्शक्तो ग्राहयितुमात्मानम् ॥ १४ ॥

प्रकाशरूपापि बुद्धिः ग्राह्यतापन्नमात्मानं करणत्वेन ग्राहयितुं न क्षमा ग्राह्यत्वेन घटादिवद्बहिरङ्गत्वात् । इदं चात्राकूतम् । प्रकाशरूपा अपि सूर्यादयो न केवलः स्वात्मानं ग्राहयन्तीति किं तु चक्षुरादिसापेक्षा एव ततस्स्मृत्यादिरूपापि बुद्धिर्न केवला स्वात्मानं ग्राहयति अपि तु करणान्तरसापेक्षैवेति तत्करणत्वेन विद्यासिद्धिः ॥ १४ ॥

ननु प्रकृतिरेव बुध्यात्मना परिणतमात्मानं पुरुषस्य भोग्यत्वेन दर्शयति पुरुषस्य तु न कर्तृत्वं अपि तु द्रष्टृत्वमेवातः कर्तृत्वात्तस्य न करणापेक्षेति पुनरपि विद्यानर्थक्यम् । अत आह—

संबन्धात्करणाद्यै-
र्भोगौत्सुक्येन तत्प्रयोक्तृत्वात् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तच्चेष्टाफलयोगा-

त्संसिद्धा कर्तृता पुंसः ॥ १५ ॥

करणैर्बुध्यादिभिः आदिग्रहणाद्विषयैश्च संबन्धाद्भोगाभिलाषेण तेषां करणादीनां प्रयोक्तृत्वात्तच्चेष्टाया विषयग्रहणात्मिकायाः क्रियायाः फलेन सुखादिना योगाच्च पुरुषस्य कर्तृत्वं सिद्धं भोग्यौत्सुक्येनेति पाठे भोग्यवस्तुविषयेणाभिलाषेणेति व्याख्येयम् । इदं चात्राकूतम् । प्रकृतेरचेतनत्वान्न पुरुषं प्रति परमार्थेन प्रवृत्तिर्युक्ता पुंस एव तु चेतनत्वेन करणादिप्रयोक्तृत्वं संभवति । ततस्तस्यैव कर्तृत्वमकर्तरि करणादिसंबन्धस्य निरर्थकत्वादिति । न च अचेतनस्यापि क्षीरस्य गवादेर्वत्सादिवृद्ध्यर्थं प्रवृत्तिर्दृष्टा । यदुक्तं सांख्यैः । वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषस्य मोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य । इति वाच्यम् । क्षीरस्यापि गवादिप्रेरितस्यैव प्रवृत्तिदर्शनात् । प्रधानस्यापि न स्वतः प्रवृत्तिरुपपद्यते यतः ॥ १५ ॥

किं चास्य कर्तृत्वाभ्युपगमे ।

व्यर्थं भोक्त्रभिधानं

व्यर्थं च ततः प्रधानचरितं वः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

नरि कर्तृत्वविहीने
न च भोग इहाप्रयोजके दृष्टः ॥ १६ ॥

यस्मात्कर्तृत्वरहिते करणाद्यप्रयोजके वा पुंसि भोगो न दृष्टस्ततो भोगस्यापि संवेदनरूपस्य क्रियात्वेन भोक्तुः कर्तृत्वानपगमात्तदनभ्युपगमे भवतां पुरुषे भोक्तृत्वकथनं तद्भोगार्थमचेतनस्य प्रधानस्य प्रवृत्तिश्च कल्प्यमाना निरर्थकत्वान्न युक्तेत्यर्थः । ततः करणादिप्रयोक्तृत्वाद्भोक्तृत्वाच्च पुंसः कर्तृत्वं सिद्धमेव । यदाहुः । प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः । अप्रवृत्तप्रवृत्तो वा स कर्ता नाम कारक इति ॥१६॥ इत्थं ज्ञातृत्ववत्कर्तृत्वमपि पुंसः स्वरूपमिति प्रतिपादितम् ।

इदानीं तयोरनादिमलावृतत्वाच्छिवस्येव सर्वत्र सर्वदा न प्रकाश इति केनापि व्यङ्ग्यता सिद्धेत्याह ।

व्यङ्ग्यं कर्तृत्वमतो
सर्वार्थत्वात्कदाचिदुत्पत्तेः ।
ज्ञातृत्ववदिह चेयं
तद्व्यक्तिकरी कला सा तु ॥ १७ ॥

ज्ञातृत्ववदिहेति । इह सकलावस्थायां ज्ञातृत्ववत्कर्तृत्वस्याप्यसर्वविषयत्वात्कदाचिदुत्पद्यमानत्वाच्च केनाप्यागन्तुकेन व्यङ्ग्यत्वं प्रतीयते ततश्च तद्व्यञ्जकतया कलातत्त्वसिद्धि-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

रित्याह । वेद्या तद्व्यक्तीति । तयोर्ज्ञातृत्वकर्तृत्वयोः एकदेशमलविदारणेन या व्यञ्जिका सा कलेति कलासिद्धिः ॥

ननु मलरुद्धापि पुंसः शक्तिः सृष्टिकाले शिवशक्त्या प्रबोधिता तिष्ठति किं कलाख्येन तत्त्वेनात आह —

पाशं तु विना नेशो
व्यञ्जयति यतो न सर्वं विषयं तत् ।
दोषो विषमो पथ्यं
विनैव नो रोगकर्तृशक्तिमिव ॥ १८ ॥

यतः संसारावस्थायां पुंसः चैतन्यं दृक्रियात्मकं न सर्वविषयं दृश्यते ततः पाशद्वारेणैव तदीश्वरोऽभिव्यनक्ति । न साक्षात् मलपरिपाके तु दीक्षाख्यया स्वशक्त्या सर्वविषयं तत्प्रकाशयतीति वक्ष्यामः । ततश्च शिवशक्तिस्तत्त्वान्तराधिष्ठानेनैवात्मनां भोगदायिका न साक्षात् । तथा सति बुद्ध्यादीनामप्यानर्थक्यप्रसङ्गादिति भावः । एतदेव दोष इत्यादि दृष्टान्तोपन्यासेन दृढयति । यथा हि विषमोऽसाम्यं प्राप्तो दोषो वातपित्तादिरपथ्यं विना रोगस्य कर्तृशक्तिमसौख्यकरणसामर्थ्यं न व्यञ्जयति अपि तु अपथ्यसेवाव्यवधानेनैव तथेशोऽपि पाशव्यवधानेनैवात्मनामसर्वविषयं चैतन्यं व्यञ्जयतीत्येतावतात्र दृष्टान्तता न सर्वथा साम्येन तस्य दु खै-

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

कहेतुत्वादीश्वरस्य च तदुपकारायैव प्रवृत्तत्वात् एतच्च कलादिकार्यकर्तृत्वमीश्वरस्यानन्ताद्यधिष्ठानेनेत्युक्तम् किरणे ।
शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनंतो सिते प्रभुरिति ॥१८॥

ननु भोगस्य कर्मनिबन्धनत्वाद्विज्ञानकेवलस्य च कर्माहितस्य सुखदुःखादिभोगसंवेदनादृष्टेः कर्मणैव केवलेनात्मनश्चैतन्यवृत्तिमीश्वरः कर्षतीत्यत आह—

न च कर्मणैव यस्मा-
च्चरितार्थं कर्म भोगनिष्पत्तौ ।
ज्ञानेऽपि च प्रसङ्गा-
त्ततश्च विद्यादिबन्धवैयर्थ्यम् ॥ १९ ॥

नात्र कर्मणैव केवलेनात्मचैतन्याभिव्यक्तिस्तस्य फलजनन एव चरितार्थत्वात्। कार्यान्तरहेतुत्वे प्रमाणाभावाच्च तस्यैव च कार्यान्तरहेतुत्वेऽभ्युपगम्यमाने विषयग्रहणाध्यवसायादिकार्येऽपि तस्यैव हेतुत्वं प्रसज्यते । ततश्च विद्याबुद्ध्यादीनामपि तत्त्वानामानर्थक्यप्रसङ्गः । ततस्तत्त्वान्तरसहकृतस्यैव कर्मणो भोगनिमित्तत्वमिति यथाध्यवसायादिकार्यान्यथानुपपत्त्या बुध्यादयः कल्प्यन्ते । एवं पुंसो ज्ञानक्रियाशक्त्याभिव्यक्त्यन्यथानुपपत्त्या कला सिध्यतीति न कश्चिद्दोषः ॥ १९ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

अत्र पराशङ्का—

पूर्वं कलादियोगा-
दग्रहणाद्दृक्क्रिये न विद्येते ।
व्यञ्जकरहिते तत्र हि
नो गृह्येते न खल्वसद्भावात् ॥ २० ॥

कलादितत्वसंबन्ध एव ज्ञत्वकर्तृत्वयोः उत्पत्तेस्तत्पूर्वकालं च तयोरदर्शनात् ते ज्ञत्वकर्तृत्वे तस्मिन्नात्मनि तदानीं स्वरूपतया न विद्येते । अपि तु कलादिसंयोग एवोत्पद्येते ततो ज्ञानाद्याधारतैवात्मनः सिध्यति न तु ज्ञत्वादिरूपतेति पूर्वःपक्षः । सिद्धान्तस्तु । व्यञ्जकरहितेति । अयमभिप्रायः । जडस्वभावस्य घटादेरिव ज्ञानसमवायाभावादनित्यज्ञानसमवायाभ्युपगमे विकारयोगेन तस्याप्यनित्यत्वप्रसङ्गात् । व्यञ्जकसंनिधाने ज्ञातृरूपस्य ग्राहकात्मनः स्वसंवेदनसिद्धत्वाच्च । नित्यमेवात्मनश्चेतनात्मकत्वमभ्युपगन्तव्यम् । तच्चात्मनस्स्वरूपमनादिमलावृतत्वाद्व्यञ्जकेन विना न प्रकाशत इत्युक्तम् । ततश्च कलादियोगात्पूर्वं व्यञ्जकरहितत्वात्ते ज्ञत्वकर्तृत्वे तत्र आत्मनि न प्रकाशेते । नत्वसत्वात् व्यञ्जकाभावकृतो हि योनुपलंभः स नाभावसाधकः । अपि तु सति व्यञ्जके । भूतनिधानादीनां सत्वेऽपि व्यञ्जकासन्निधानेऽनुपलंभात् ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एतदेवाह—

उपलम्भके च सत्यपि
लोके यन्नोपलभ्यते तदसत् ।
ज्ञानक्रिये च तद्व-
न्नासद्भूते कदाचिदलः ॥ २१ ॥

यस्य हि घटादेः प्रदीपादिव्यञ्जकसद्भावेऽपि नोपलंभः तस्यैवासत्वम् । नान्यस्यान्धकारादितिरोधानेनानुपलभ्यमानस्य अतश्च ज्ञानक्रियेऽपि व्यञ्जकाभावादेव नोपलभ्येते तस्मात्कदाचिदपि नासत्तां व्रजत इत्याह । ज्ञानक्रिये चेति । ननु जन्मनः पूर्वमनुभवितुर्ज्ञानादिसत्तानिश्चयाभावात् संशय एव युक्तः । तन्न । तदहर्जातानामपि बालानां पानचरणाभिघातादिचेष्टाविशेषस्य प्रयत्नपूर्वकस्य हिताहितस्मरणाविनाभावेन व्यवहारकाले सिद्धस्य दर्शनात् । जन्मनः प्रागपि ज्ञत्वकर्तृत्वयोः सत्वं सिद्धमेव यतः ॥ २१ ॥

एतदेव दृष्टान्तेन साधयति—

प्राक्पचनव्यापारा-
त्तत्सिद्धिः पाचके यथा तद्वत् ।
बोधात्करणाच्चाणोः
पूर्वं सिद्धे कुतस्तच्छक्तिः ॥ २२ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

यथा पचनक्रियादर्शनेन तत्पूर्वकालं परिदृश्यमानं पचनसामर्थ्यं पाचके प्रागेवास्तीति गम्यते। न तु तत्कालमेवोत्पद्यते इत्येवं ज्ञानकार्ययोर्दर्शनादात्मनस्ते ज्ञानक्रियाशक्ती प्रागेव विद्येते इति निश्चीयते। तदुक्तं श्रीमन्मृगेन्द्रे। चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा। सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखमिति ॥ २२ ॥

ततश्च।

व्यञ्जकसापेक्षत्वा-
त्तन्मूलं दृक्क्रियावरणमस्ति यतः।
यदभावे दृक्क्रिययोः
सर्वार्थत्वादणोर्न संसरणम् ॥ २३ ॥

यतः संसारावस्थायां ज्ञानक्रिययोर्व्यञ्जकापेक्षा दृश्यते अतस्तदपेक्षायाः कारणं दृक्क्रियाच्छादनं किमप्यस्तीत्यवसीयते। यस्याभावे मुक्तात्मनां ज्ञत्वकर्तृत्वयोरीश्वरवत्सर्वविषयकत्वात्पुनः संसारयोगो नास्तीति श्रूयते। ननु। सांख्यैर्निर्मल एवात्माभ्युपगतः। तदसत्। संसारावस्थायां तस्य पारतन्त्र्यदर्शनात्तस्य चाहेतुकत्वे मुक्तस्यापि पारतन्त्र्यप्रसङ्गात् ज्ञानक्रिययोर्व्यञ्जकापेक्षणाच्च। यच्छ्रूयते। पाशाभावे पारतन्त्र्यं वक्तव्यं किं निबन्धनमित्यादि ॥ २३ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एषां चाऽव्यक्तादीनामुत्पत्तिक्रममाह —

अव्यक्तरागविद्याः
कलासमुत्थाः कला च मायाजा ।
वसुधाद्यस्तत्त्वगणः
प्रतिपुंनियतः कलांतोयम् ॥ २४ ॥

पर्यटति कर्मवशतो
भुवनजदेहेष्वयं च सर्वेषु ।
भुवनाकृतयश्चान्ये
स्कन्धा ज्ञेयाः कलान्तानाम् ॥ २५ ॥

यदुक्तं रौरवे । कलातत्त्वाद्रागविद्ये द्वे तत्त्वे संबभूवतुः । अव्यक्तं चेति । कला चेति । च शब्दात्कालनियती च माया समुत्पन्ने कालनियत्योरपि मायोद्भूतत्वेन भोगक्रियोपकारकत्वेन च श्रुतेः । तथा हि । नियत्यभावे ह्यन्योपार्जितान्यपि कर्माण्यन्ये भुञ्जीरन् । राजनियमाभावे द्विजादिकृष्यादिफलानीव दस्यवः इति नियामकत्वेन नियतिः सिद्धा । कालश्चापि तस्यैव भोगावधिनियमहेतुश्चिरक्षिप्रादिप्रत्ययलिङ्गः सिद्ध एवेत्यादिविस्तरेणोक्तमस्माभिर्मृगेन्द्रवृत्तिदीपिकायां तत्त्वप्रकाशवृत्तौ च । प्रोक्तं च मृगेन्द्रे । त्रुट्यादिप्रत्ययस्यार्थः

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

कालो मायासमुद्भवः । कलयन्नासमुत्थानान्नियत्या नियतं पशुमिति । एतच्च तत्त्वद्वयं कलाद्यपेक्षया बहिरङ्गत्वादाचार्येण विस्तरेण न साधितमपि तु च शब्देन सूचितमित्यविरोधः । एतश्च कलादित्रिंशत्तत्त्वात्मकं सूक्ष्मशरीरं प्रतिपुरुषनियतत्वेन तेषां भोगसाधनमित्याह । **वसुधाद्य इति** । तदुक्तं मृगेन्द्रे । प्रयोक्त्रादिमहीप्रान्तमेतदण्वर्थसाधकमिति । अत एव दीक्षायां सूक्ष्मदेहशुद्धिर्मायातत्त्वाधोभाग एव स्थाने कार्येत्युक्तं रौरवादौ । ननु श्रीमत्कालोत्तरे शब्दस्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम् । बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतमिति श्रूयते । सत्यमत एवैतत्सूत्रं भगवता रामकण्ठेन त्रिंशत्तत्त्ववाचकतया व्याख्यातम् । यद्येवं कथमस्य पुर्यष्टकत्वं भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणेन गुणतत्त्वेन तदापूरकेण च प्रधानेन भोक्तृस्वरूपोपकारकेण कलादिपञ्चकञ्चुकात्मना च वर्गेणारब्धत्वादित्यविरोधः । तच्च सूक्ष्मशरीरं बाह्यशरीरभेदेऽपि सृष्टेरारभ्य संहारान्तं तदन्तराले मोक्षप्राप्त्यन्तं वा एकस्य एकमेवेत्यवगन्तव्यम् ॥ इत्थमसाधारणरूपं कलादितत्त्वसृष्टिमुक्त्वात्मन एव कर्मानुगुणभुवनजदेहविषयाद्याधारभूतां भुवनात्मिकां साधारणीं सृष्टिमाह । **भुवनाकृतयश्चेति** ॥ २४ ॥ २५ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एषां च तत्त्वानां प्रतिपुरुषं नियततयाचैतन्ये सत्यनेकत्वाद्भुवनाधारत्वेन सावयवत्वाच्च कार्यत्वसिद्धेस्तदुपादानं मायासिद्धेत्याह—

विकृतेः परतो माया
नित्या विभ्वी ह्यचेतना चैका ।
सर्गस्थितिविलयाना-
माधारः कारणं च सा जगतः ॥ २६ ॥

उपादानकारणत्वात्सृष्ट्यादीनामाधारत्वेन विकृतेः स्वकार्यवर्गस्य परतः पठ्यत इति शेषः । सा च नित्या । परमकारणत्वात्तस्याप्युपादानाभ्युपगमेऽनवस्थाप्रसङ्गाच्च । विभ्वी च स्वकार्यव्यापिका । किं चाचेतना उपादानत्वादेव मृदादीनामुपादानानामचैतन्यमेव दृश्यते । यतः । एका च परमकारणत्वादेव अनेकत्वे ह्यचैतन्ये सत्यनेकत्वाद्घटादिवत्कारणान्तरं मृग्यमतश्चानवस्था स्यात् । अत एव परमाणवो न परमकारणमित्युक्तम् । ननु परमात्मैव जगदुपादानमिति वेदान्तविदः । तदयुक्तम् । तस्योपादानत्वे तत्त्वादिवज्जडत्वप्रसङ्गात् । चेतनाचेतनकारणत्वेऽस्यापि तद्रूपत्वेन सांशतया कार्यत्वप्रसङ्गाच्च । यदा यद्रूपिणो भावास्तदा तद्रूपेण हेतुजा इति । एतच्च दूषणं पाञ्चरात्राभ्युपगताया नारायणाख्याया:

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

परप्रकृतेरपि विज्ञेयं न्यायस्य समानत्वात् अत्र सर्गस्थिति-विलयानामाधार इत्यनेन सत्कार्यवाददृशा महाप्रलये कलादिकार्याणि सूक्ष्मरूपेण मायायामवस्थितानीति दर्शयति। यच्छ्रूयते। तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ। विकृतौ व्यक्तिरूपाणि व्यप्रियंतर्थऽसिद्धय इति। एष च सत्कार्यवादोऽस्माभिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेण साधितः॥ २६॥

इत्थं शुद्धाध्वानं प्रतिपाद्य यस्येदमुपकारकं तमाह—

नित्यं विभु च मलेन
ह्यनादिसंरुद्धदृक्क्रियं तत्त्वम्।
पश्वभिधानं यस्य हि
भोगायायं तु परिकरोऽभिहितः॥ २७॥

यस्य कर्मभोगार्थं साधारणासाधारणरूपो मायीयः परिकरोऽभिहितः। तदात्मवृन्दमलेन पशुत्वाख्ये नानाद्यावृतज्ञानक्रियत्वात्पश्वाख्यं तत्त्वमुच्यतेऽत्र एव न मलस्य तत्त्वान्तरत्वमपि तु पशुतत्त्व एवान्तर्भावः तेन विना पशुत्वायोगाच्च तत्तत्त्वं नित्यं न तु बौद्धानामिव क्षणिकम्। पूर्वानुभूतस्मरणदर्शनात्। क्षणिकत्वे कर्मानुष्ठानतत्फलभोक्तृत्वयोरनुपपत्तेश्च। किं च विभुः। न तु क्षपणकानामिव शरीरपरिमितः।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

सङ्कोचविकासधर्मी वा । तादृशस्याचेतनत्वानित्यत्वादिदोषप्रसङ्गात् । कर्मफलभोक्तृत्वेन च भोगवैचित्र्यदर्शनात् । अनेकत्वमात्मनामर्थसिद्धमेव । वक्ष्यति च संक्रान्तिनिराकरणसमये । अत्र यदा कूटस्थनित्येन मलेन प्रवाहनित्येन च कर्मणा अनादिसंबन्धस्य मोक्षदित्सायां शंभुर्मलपरिपाकार्थं कर्मभोजनाय मायीयेन कलादिना संबन्धं करोति तदा वसावात्मा सकल इत्युच्यते महाप्रलये तु कलाद्युपसंहारान्मलकर्मयुक्तः प्रलयाकलः विज्ञानयोगादिना कर्मणो विनाशात्केवलमलयुक्तो विज्ञानकल इत्यादिपशुभेदोऽस्माभिस्तत्त्वप्रकाशवृत्तौ विस्तरेण दर्शितः ॥ २७ ॥

अयं च ।

ध्वंसितबन्धनजालो
दीक्षाज्ञानाख्यया तु शिवशक्त्या ।
शुद्धोऽध्वा तत्त्वाना-
माप्रकटीकृतदृक्क्रियश्चाणुः ॥ २८ ॥

तत्र ह्याचार्यकृतः निरधिकरणो वा शिवस्यानुग्राह्यविषयः शाक्तो व्यापारो दीक्षोच्यते ततो दीक्षाज्ञानादिशब्दवाच्यया शिवशक्त्यापनीतमलादिपाशजालोऽत एव प्रकाशितसर्वार्थज्ञानक्रियोऽणुरात्मा शुद्धाध्वसंज्ञो भवति यदुक्तं रौरवे ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

सर्वाञ्जनविनिर्मुक्तं शिवंशक्तिकले स्थितम् । आत्मतत्वमिदं शुद्धमिति ननु ज्ञानादेवात्मनां मोक्ष इति वेदान्तिसाख्यादय: तदयुक्तम् । मलस्य द्रव्यत्वाच्चक्षुष: पटलादेरिव न ज्ञानमात्रान्निवृत्ति: संभवति । अपि तु । चक्षुर्वैद्यव्यपारेणेव दीक्षाख्येनेश्वरव्यापारेणैव यत: । उक्तं स्वायंभुवे । दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपीति ॥ २६ ॥

इयं च संज्ञा स्यानुग्रहोत्तरमधिकारादिनिबन्धनदेहसंयोग एव न तु शिवसाम्यरूपपरमुक्तिप्राप्तौ तदानीं मुक्तशिवत्वेनैव व्यवहारादित्याह—

पश्यति शिवं स्वशक्त्या
ध्यायति चासौ शिवेद्धया दृष्ट्या ।
यजते शंभुं मन्त्रै-
रुपकाराय्यात्मनः परेषां च ॥ २९ ॥

असौ शुद्धात्मा शिवसमर्थतया स्वशक्त्यात्मिकतया दृष्ट्या शिवं ध्यायति पश्यति च । तदुक्तं मोक्षकारिकासु । शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा । शिवं शक्त्यादिभि: सार्धं पश्यत्यात्मा गतावृतिरिति । अत एव पातञ्जलाद्युक्तवद्बुध्यादिविषयत्वं शिवस्य न संभवति । तस्य पाशागोचरत्वात् । यदुक्तं तत्रैव । अन्त:करणवृत्तिर्या बो-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

धाख्या मा महेश्वरम् । न प्रकाशयितुं शक्ता पाशत्वान्निगलादिवदिति । किं चासावात्मनः परेषां च उपकारार्थं तमेव विविधैर्यज्ञैर्यजति । यदुक्तं रौरवे । यजन्ति विविधैर्यज्ञैर्मन्त्रतन्त्रविशारदाः । गुरुतन्त्राद्यनुज्ञाता दीक्षाविच्छिन्नबन्धनाः । इति । तत्राचार्या विद्येश्वरादयश्चाधिकारक्षयादात्मोपकारार्थं भोगमोक्षदानादिपरोपकाराय च यजन्ति । साधकः पुत्रको वाऽऽत्मन एव भोगमोक्षार्थमिति भेदः ॥ २९ ॥

तेषु मध्यान्मायागर्भाधिकारीश्वरतत्त्वमाह—

मण्डलिनः श्रीकण्ठः
 क्रोधाद्याः शतभवाः सवीरेशाः ।
एते कलादियोगात्
 प्रकटीकृतदृक्क्रियाः परेशेन ॥ ३० ॥

तत्र मण्डलिनः अष्टौ कलामस्तकस्थाः । यदुक्तं रौरवे । मण्डलाधिपतिभ्यो यस्तत्त्वमार्गं प्रतिष्ठित इति । श्रीकण्ठो गुणतत्त्वनिलयोऽधस्तनभुवनादेश्च कर्ता क्रोधादयश्च गुणमस्तकस्था अष्टावेव शतभवाः शतरुद्राः ब्रह्माण्डधारकाः । वीरेशो वीरभद्रः शतरुद्राधिष्ठाता एते च शिवेनैव प्रकटीकृतदृक्क्रियाः ततश्चारिरनिबन्धनात्कलादियोगादपि पशुवन्न विपरीतज्ञानयोगिनः शिवेन साक्षादनुगृहीतत्वात् । यदुक्तम् ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

कलायोगेऽपि नो वश्याः खलानां पशुसङ्घवदिति । स तु कलादियोगस्तेषामनन्तकर्तृक एव । शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुरिति श्रुतेः ॥ ३० ॥

ते च ।

कुर्वन्ति भुक्तिमुक्ती
स्वगोचरे नियोगतः पुंसाम् ।

एतच्चापरमन्त्रेश्वरतत्वं मायागर्भाधिकारीत्याह--

मन्त्रेशतत्वमेतं
मायाकार्याधिकार्यपरम् ॥ ३१ ॥

इत्थं परममन्त्रेशानुक्त्वा मन्त्रान्वक्तुमाह—

सर्गादावणुकोट्यः
सप्तेशानेन दारितावरणाः ।
ज्वालितदृक्कर्तृत्वा
तत्वं मन्त्राख्यमेतद्धि ॥ ३२ ॥

अत्र च विज्ञानकेवलानष्टौ बोधयामास पुद्गलानिति श्रुतेः शुद्धाध्ववर्तित्वाच्च विज्ञानकलानां मध्यात् परिपक्वमलानामेव तत्पाकतारतम्यवशाद्विद्येश्वरत्वे मन्त्रेश्वरत्वे च नियोगः । अपरमन्त्रेश्वरत्वेऽशुद्धाध्ववर्तित्वादपक्वमलानां

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

प्रलयाकलानामेवेति मन्तव्यम् । मन्त्रशब्दश्चात्र मननं सर्वविदित्वं त्राणं संसार्यनुग्रहः । मननत्राणधर्मित्वान्मन्त्र इत्यभिधीयते इति श्रुतेः शिवशक्तितदनुगृहीतेषु च वर्तते । उपचारात्तु वाचकशब्दानां मन्त्रत्वमिति वक्ष्यामः । निर्मलत्वाच्च प्रकाशितज्ञानक्रिया एते मननादिधर्मयोगाच्छुद्धविद्यातत्त्वाश्रितत्वाच्च रौरवादौ शैवशास्त्रे मन्त्रतत्त्वमित्युच्यन्ते । अत एव शुद्धविद्यासंयोजनात्पूर्वं मायोर्ध्वस्थान एव मलविच्छित्तिर्दीक्षायां कार्येति गुरवः ॥ ३२ ॥

अथैषामनुग्रहकरणत्वमाह—

जगति कृते तत्त्वार्धं
मन्त्राणां शिवसमाहृतान्पुंसः ।
अनुगृह्य याति हि विना
देशिकमूर्तिं प्रयुक्तमीशेन ॥ ३३ ॥

तत्र तेषु सप्तकोटिसङ्ख्येष्वणुषु मध्यादर्धं गुर्वधिकरणमनपेक्ष्यैवेश्वरेण प्रयुक्तं सत् शिवसमाहृतान् शिवेनैवानुग्रहशक्त्या विषयीकृतान् पुंसोऽनुगृह्य सृष्ट्यनन्तरमेव यातीत्यनुग्रहमिति शेषः । यदुक्तं मृगेन्द्रे । प्रयोक्तृदेहसापेक्षं तदर्धमखिलेध्वनि । कृत्वाधिकारं स्थित्यन्ते शिवं विशति सेश्वरम् । विनाधिकरणेनान्यत्प्रधानाविकृतेरधः । कृत्वा-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

धिकारमीशेष्टमुपैतीति । तेषु मध्याद्विशिष्टमलपाकवन्तः सृष्ट्यनन्तरमेव मोक्षभाजः । अन्ये संहारकाल एवेत्यर्थः ॥

अत एवान्यस्यार्धस्य व्यापारमाह ।

शिवकृतमण्डलमन्त्रैः
युक्तश्चान्यत्प्रयुक्तमीशेन ।
देशिकदेहस्थेन तु
दीक्षाख्येन प्रयोगेण ॥ ३४ ॥

विषवन्निकृन्तति पशोः
सहसा मलकर्मयोनिकार्याणि ।
आराधितं तु सिद्धीः
यच्छति विविधाश्च साधकेन्द्रेभ्यः ॥

शिवेन पश्वनुग्रहार्थमुत्पादितैर्महामण्डलाविद्याङ्गादिमण्डलैस्तेषु पूज्यतया श्रुतैर्मन्त्रैश्च सहितमन्यदर्धमाचार्यमूर्तिस्थेनेशेन प्रयुक्तं सत्पशोर्मलकर्ममायाकार्याणि विषमिव सहसा निकृन्तति । अत एव सकलस्यैव गुर्वधिकरणशिवानुग्रहः तस्यैव बन्धत्रययोगात् । मलश्चात्र एक एवानेकात्मावारकानेकशक्तियुक्तो नित्यो व्यापकश्च । यदुक्तं । यदेकं सर्वभूतानामनादि निबिडं महत् । प्रत्यात्मस्थस्वकालान्तापायि

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

शक्तिसमूहवदिति । ततश्च यस्याः शक्तेः पाकः तस्या एव दीक्षया रोध इति मलैक्ये युगपत्सर्वमोक्षप्रसङ्गोपि परिहृतः । कर्म च धर्माधर्मात्मकं पुरुषनियतं प्रवाहानादि योनिस्तु माया तत्कार्याणि च साधारणासाधारणरूपाणि कर्मनिमित्तत्वादागन्तुकान्यपि प्रवाहानादीन्येव । बीजाङ्कुरवदनादित्वेनैव कर्मशरीरप्रबन्धस्य सिद्धेः । एतानि च मलादीनि दीक्षाख्येन मन्त्रकरणेनेश्वरव्यापारेण निवर्तंते यथा मन्त्रपूर्विकया क्रियया विषनिवृत्तिर्दृश्यते अतश्च मन्त्राणामनुग्राहककरणत्वं विद्येश्वराणां तु परापराणामाचार्यवत्तत्कर्तृत्वमिति भेदः । किञ्चैतदन्यदर्थमाराध्यमानं साधकेभ्यो भोगाभिलाषिभ्यो विविधाः सिद्धीः प्रयच्छति । यदुक्तं रौरवे ।

दीक्षापूता गणपतिगुरोर्मण्डले जन्मवन्तः
सिद्धा मन्त्रैस्तरुणदिनकृन्मण्डलोद्भासिदेहाः ।
भुक्त्वा भोगान्सुचिरममरस्त्रीनिकायैरुपेताः
स्रस्तोत्कण्ठाः शिवपदपरैश्वर्यभाजो भवन्ति ॥ इति ॥ ३५॥

ननु दीक्षया बन्धनिवृत्तिरात्मनो जातेति कथमवगम्यते अत आह—

शुद्धिं व्रजति तुलायां
दीक्षातो ब्रह्महत्यतो मुख्यात् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

प्रत्ययतो जानीया-
दिन्धनविगमं विषक्षयवत् ॥ ३६ ॥

इह यद्दीक्षायां महापातकयोगिनोऽप्यपेतपातकत्वं दृष्टम् । तथा हि । श्रीमत्कालोत्तराद्युक्तवन्मन्त्रलब्धघटारोपणेन तस्य गौरवं परीक्ष्य पश्चादुद्धातमन्त्रोच्चारणादिपूर्वं तच्छुद्धिं कृत्वा पुनर्घटारोपणे तस्य लाघवमुत्पद्यमानं दृश्यते । एतच्चोपलक्षणं निर्बीजकरणादीनां प्रत्ययान्तराणां ततोऽस्माद्दृश्यमानात्प्रत्ययाद्दाहितुण्डिकक्रियया विषहरणवद्दीक्षाख्यया क्रियया बन्धनापगमः सिद्ध इति ज्ञातव्यः । तत एव च दृष्टार्थेषु विषभूतरसवादादिषु तदागमस्य फलवत्त्वं दृष्ट्वा तद्वदेवादृष्टस्यापि तच्छास्त्रस्य सत्यत्वमनुमीयत इति शिवस्य परमाप्तत्वं सिद्धम् । यदुक्तम् । 'विषाग्रभावसंदृष्टमन्त्रवादाच्च सस्वरात् । रसोपनिषदाटोपादाप्तः सपरिगृह्यत इति ॥ ३६ ॥

नन्वेवञ्चेद्दीक्षयैव समस्तपापक्षयात्तत्क्षणमेव शरीरपातप्रसङ्ग इत आह—

एष्यत्फलकृतिदाहा-
द्दीक्षितमात्रस्य पतति नो पिण्डः ।
भवति च काचिद्दीक्षा
या हन्त्यपि वर्तमानफलम् ॥ ३७ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एष्यत्फलानामेव कर्मणां सद्यो निर्वाणदीक्षया दाहादारब्धकार्यस्य कर्मणोपस्थापितत्वाच्च दीक्षोत्तरकालं शरीरस्थितिरविरुद्धा । यदुक्तं किरणे 'अनेकभाविकं कर्म दग्धबीजमिवाणुभिः । भविष्यदपि संरुद्धं येनेदं तद्धि भोगत इति'। अत्यन्तमलपरिपाके तु सद्यो निर्वाणदीक्षया तस्यापि क्षय इत्याह—**भवति चेति** । तत्रापि संस्कारवशात् किञ्चित्कालं स्थितिः संभवत्येव । यदाहुः । 'तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर इति ॥ ३७ ॥

इदानीं भविष्यदपि संरुद्धमिति ज्ञापकोक्तं विशेषयति ।

कृतमपि फलाय न स्या-
द्दीक्षोपयूषरोप्तबीजमिव ।
बलवद्विशेषशास्त्र-
व्यतिकरजातं विहाय कर्मैकम् ॥ ३८ ॥

दीक्षोत्तरकालं विहितत्वेनानुष्ठीयमानमिष्टापूर्तादिरूपं कर्म दीक्षयैव रुद्धशक्तित्वान्न पुनश्शरीरयोगादिफलजनकं विशेषशास्त्रसिद्धं साधकेनानुष्ठीयमानं तु मन्त्राराधनादि कर्म फलदमेव । यदुक्तम् सूक्ष्मस्वायंभुवे । 'यो यत्राभिलषेद्भोगान्स तत्रैव नियोजितः । सिद्धिभाङ्मन्त्रसामर्थ्यादिति'। किञ्च—मुमुक्षोरपि विशेषशास्त्रविहितानुष्ठाने तन्निषिद्धानु-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

ष्ठाने चाकृतप्रायश्चित्तस्य प्रत्यवाययोगश्श्रूयते । 'आज्ञाविलङ्घनात्प्रोक्तं क्रव्यादत्वं शतं समाः' इति । तद्विहितत्वादेव च सामान्यशास्त्रसिद्धोऽपि वर्णाश्रमाचारो अनुष्ठेय एव । यच्छ्रूयते । 'इति वर्णाश्रमाचारान्मनसापि न लङ्घयेत् । यो यस्मिन्नाश्रमे तिष्ठन्प्राप्तो दीक्षां शिवात्मिकाम् । स तस्मिन्नेव संतिष्ठन्शिवधर्मश्च पालयेत् ।' इति ॥ ३८ ॥

ननु समयोल्लङ्घनादिप्रत्यवाययुक्तस्याकृतप्रायश्चित्तस्य मोक्षो वा न वाऽत आह——

तस्मादप्यकृतविधिः
किञ्चित्कालं पिशाचवरराजः ।
भ्रान्त्वा विमलात्माऽसौ
व्रजति हि समतां परेशेन ॥ ३९ ॥

अत्र च दीक्षोत्तरकालं स्नानार्चनादिसमयानुष्ठानेनारब्धकार्यपाशक्षयः प्रत्यहमपचयेन क्रियते ततः सापेक्षदीक्षाभाजां शक्तानां समयाचारविशेषोनुष्ठेयः । बालिशानाञ्च निरपेक्षदीक्षाभाजां गुरुशुश्रूषाशिवार्चनादि यावच्छक्यमनुष्ठेयमत एव तदनुष्ठानेन दीक्षानिष्पत्तिरनुमीयते । ततश्च यस्य मलपरिपाकबलेन तीव्रतरशक्तिपातनं न दीक्षावैकल्यम् नापि समयोल्लङ्घनादि तस्य देहपातानन्तरं मोक्षः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

यस्य तु मलपरिपाकमांद्यान्मंदतरादिशक्तिपातस्य दीक्षोत्तरं दैवान्मानुषात्प्रतिबलात्समयोल्लङ्घनं समुत्पद्यते सोननुष्ठितसमयाचारोऽकृतप्रायश्चित्तविधिश्च पिशाचराजात्मकं समयोल्लङ्घनफलं काम्यफलमिवानुभूय पुनर्विमलात्मा परशिवसाम्यं मोक्षरूपं प्राप्नोति । यदुक्तं—प्रायश्चित्तविशुद्धस्य मतिः शुद्धा प्रकीर्तितेति । यस्य तु दृष्टार्थतया कृत्रिमगुरुभक्त्यादिना कृतदीक्षितस्य बुद्धिपूर्वमेव समयाननुष्ठानं न तस्य सा निष्पन्ना । गुरुश्च प्रायश्चित्ती भवति । यच्छ्रूयते तत्र मिथ्याप्रयुक्तोऽणुः प्रायश्चित्ती भवेद्गुरुः इति । आत्मदीक्षां गुरुः कुर्याद्व्यभिचारिणि दीक्षितः ।। इति च ॥ ३९ ॥

इत्थं प्रासङ्गिकदीक्षाफलं प्रतिपाद्य प्रकृते मन्त्रानन्तरं मन्त्रेश्वरानाह ।

मन्त्रादिसर्गपूर्वं
त्वष्टौ देवेन दारितावरणाः ।
अणवः कृतसर्वार्थ-
ज्ञानव्यापारसामर्थ्याः ॥ ४० ॥

मन्त्रादिसृष्टेः प्रागेवाष्टावणवः विज्ञानकलाशिवेनापनीतमलाः सर्वविषयज्ञानक्रियाश्च संपन्नाः । यदुक्तं मृगेन्द्रे ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

'तत्रादौ केवलाणूनां योग्यानां कुरुतेऽष्टकम् । वामादिशक्तिभिर्युक्तं सप्तकोटिपरिच्छदमिति' ॥ ४० ॥

के ते किञ्च कुर्वतीत्यत आह ।

तेऽनन्तेशप्रमुखाः
पतिभावात्प्रेरयन्ति मन्त्रादीन् ।
सर्गस्थितिलयमुक्तीः
कुर्वन्ति हरेच्छया नुन्नाः ॥ ४१ ॥

ते चानन्तसूक्ष्मशिवोत्तमैकनेत्रैकरुद्रात्रिमूर्तिश्रीकण्ठशिखण्डिसंज्ञाः मन्त्रमहेश्वरत्वेन मन्त्रादीन्प्रेरयन्ति किञ्च सर्गादिचतुष्टयं तदविनाभूतं भोजनात्मकं तिरोभावञ्च कुर्वन्ति । यदुक्तं रौरवे । स्थितिसंरक्षणादानभावानुग्रहकारिणः । इति । पञ्चकृत्याधिकारित्वेऽपि नैषां शिवसाम्यमित्याह । **हरेच्छया नुन्ना** इति । अधिकारमलयोगेन प्रेर्यत्वाच्छिवापेक्षयैषां कलया न्यूनं कर्तृत्वम् । मन्त्रमन्त्रेश्वराणां तु ततोऽपि न्यूनमत एवानन्तस्य सर्वोत्कृष्टत्वं श्रूयते । तेषामनन्तशक्तीनामनन्तः परमेश्वर इति । सर्वज्ञत्वं तु सर्वेषां समानमेव । विशेषाश्रवणात् । एषाञ्च सर्वेषां महाप्रलयेऽधिकारविरामान्मुक्तिरित्युक्तं रौरवादौ । 'अनन्तः परमेतेषां महतां चक्रवर्तिनाम् । विहितं सर्वकर्तृत्वकारणं परमं पदमिति ॥४१॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एवं चेश्वरतत्त्वाश्रिता मन्त्रमहेश्वरत्वेनोच्यन्त इत्याह ।

मन्त्रेशतत्त्वमेत
त्परमणवोऽध्वद्वये च तत्पतयः ।
अभिधायकमनुलिङ्गा-
द्यभिधानं नो निरर्थकं यस्मात् ॥ ४२ ॥

अध्वद्वये शुद्धाशुद्धात्मिके मननत्राणयोगिनोऽणवस्तत्पतयश्च मन्त्रेश्वरा मन्त्रमहेश्वरा उच्यन्ते । अनेनाशुद्धाध्ववर्तिनः साञ्जना अपि मन्त्राः संभवन्तीति दर्शयति । यदुक्तम्—'अन्ये प्राधानिका मन्त्रा ब्रह्मविष्ण्वादयः परे । साञ्जनास्तेऽण्डमध्यस्थाः सात्वराजसतामसा' इति । अतश्च वाचकशब्दानामचेतनत्वेन मननत्राणधर्मासंभवात् अभिधायकत्वेनोपचारान्मन्त्रशब्दवाच्यत्वमित्याह । **अभिधायकेति** । घटपटाद्यभिधानेशब्दो वाच्यार्थनिष्ठ एव दृश्यते तस्मादनन्ताद्यभिधायकशब्दात्मकैर्मन्त्रैर्लिङ्गभूतैरभिधेयास्ते मन्त्रेश्वराद्यात्मानः तज्जपादिना फलप्रदातारः सिद्धाः । एतेन शब्दमात्रमेव देवतेति ये मीमांसका मन्यन्ते ते प्रतिक्षिप्ताःव अचेतनस्य चेतनाधिष्ठानादेव कार्यकरत्वादतश्च प्रतिमादावि । मन्त्रात्मके शब्दे अभिव्यक्ताश्शिवादिवाच्यमन्त्रा एव फलदा इत्यवगन्तव्यम् ॥ ४२ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

अत्र च शब्दस्य रचनावत्त्वेन घटादिवत्कार्यत्वाच्छब्दार्थसंबन्धस्यापि नित्यत्वायोगेन सांकेतिकत्वात्सर्वज्ञ एवेश्वरस्तत्संकेतकर्तेत्याह--

विद्याविद्येशानां
सामान्यविशेषधर्मविच्छंभुः ।
मंत्रानकरोद्यस्मा-
दर्थविदभिधानकृद्दृष्टः ॥ ४३ ॥

यस्मात्पुत्राद्यर्थानां तत्तदर्थविदेव पित्रादिर्लोकेऽभिधानकृद्दृष्टः तस्मान्मन्त्रेश्वरात्मनामपि वाचकान्मन्त्रान् शंभुरेवाकार्षीत् । स एव तेषां सामान्यविशेषलक्षणज्ञो यतः । सामान्यलक्षणं तेषां नित्यत्वव्यापकत्वादि । विशेषलक्षणं तु मलावशेषतस्तत्तत्पदयोज्यत्वमित्यवगन्तव्यम् । अत्र मन्त्राद्यात्मकशब्दोपादानतया विद्येश्वरादीनां देहेन्द्रियाद्याधारभूतशुद्धाध्वभुवनोपादानत्वेन कुण्डलिन्याख्या महामायासिद्धा । यदुक्तं रौरवादौ । मायोपरि महामायेति । मृगेन्द्रेऽपि । शक्तेर्नादो भवेद्बिंदुरक्षर मातृका ततः इति । शुद्धाध्वन्यपि मायायाः परस्या इति च । एवं च विद्येश्वरसदाशिवादिशुद्धतत्वभेदः तत्कारणभूतपरबिंदुसिद्धिप्रकारश्च मतङ्गादौ

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

विस्तरेणोक्तः साधितश्च रत्नत्रयोल्लेखिन्यामस्माभिरिति तत एवावधार्यम् ॥ ४३ ॥

अथैषां विद्येश्वरादीनां स्वस्वाधिष्ठेयोपाधिभेदभिन्नाभ्यां शक्तिशिवाभ्यां संहातिरूपत्वमागमेषु श्रूयत इत्याह—

अणुशक्तिशंभुपक्षा
विद्या विद्येश्वरेषु विद्वद्भिः ।
एकश्शिवोऽविकारी
तच्छक्तिश्चाप्यतो न योग्यौ तौ ॥४४॥

बहुधा स्थातुं यद्वा
चैतन्यविनाकृतौ विकारित्वात् ।
अथ शंभुरेक एव हि
योगीव भवेदनेकमूर्तिस्थः ॥ ४५ ॥

गीतायां श्रूयते । 'अनुग्रहाय लोकस्य शिवो मन्त्र इति श्रुतिः । यात्वनुग्राहिकाशक्तिः सा मन्त्रत्वमिहागता' इति । 'चतुर्विंशतिराख्याता मन्त्राणामीश्वराः पराः । आणवाश्शांभवाश्शाक्तास्तथान्या मन्त्रकोटयः । अण्डस्याधारकाह्येवं वीरभद्रपुरस्सराः ।' इति च । एषु चाणुपक्षस्य प्रोक्तवन्मुख्य एव भेदः । शंभुशक्तिपक्षयोस्तु तदधिष्ठानवशादौपचारिक इत्याह— **एकश्शिव इति** । अत्रैक एव शिवो जगत्कर्ता

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सर्वानुग्राहकश्च तस्यैवानादिमुक्तत्वात् । उक्तञ्च रौरवादौ । 'शिवतत्वं परं ह्येकमिति' । श्रुतिरप्याह—एक एव रुद्रो न द्वितीयाय तस्थ इति । न चानेकेश्वरत्वे जगत्कार्यसिद्धिः । अनेककर्तृणां रथादीनामपि एकस्थपतीच्छानुवर्तनं विनाऽनुत्पत्तेः । यदाहुः । 'बहवो यत्र नेतारः सर्वे पण्डितमानिनः । सर्वे महत्वमिच्छन्ति तद्वृन्दमवसीदति ।' इति । अनेन प्रवाहेश्वरपक्षोऽपि निरस्तः । ऐश्वर्यस्य स्वरूपव्यक्तिलाभात्मकत्वेन विनाशानुपपत्तेः । स चाविकारी नित्यत्वाच्चेतनत्वाच्च । तच्छक्तिश्च तादृश्येव तद्धर्मत्वात् न हि नित्यस्यानित्यधर्मयोगः । धर्मधर्मिणोरव्यतिरेकेण धर्मिणोऽप्य नित्यत्वप्रसङ्गात् अतस्तौ शक्तिशिवावनन्तादिभेदेन बहुधा स्थातुं युक्तौ । यद्वा तयोरनेकधाऽवस्थानमभ्युपगम्यते तदा विकारित्वान्मायादिवदचेतनौ प्रसज्येते तयोश्चाचेतनत्वं न युक्तम् चेतनत्वेनैव श्रवणात् अचेतनस्य चेतनाधिष्ठानं विना परिणामाद्ययोगाच्च । तस्मादौपचारिक एव तयोर्भेदः । यच्छ्रूयते । 'अधिकारी स भोगी च लयी स्यादुपचारत' इति । तथा । 'किं तु यः पतिभेदोऽस्मिन्स शास्त्रे शक्तिभेदवत् । कृत्यभेदोपचारेण तद्भेदस्थानभेदज इति' च । अत्र पराशङ्कामाह—अथ शंभुरिति । एकोऽपि शिवः योगिवदनेकदेहाधिष्ठानेन सदाशिवानन्तादिसंज्ञाभेदं लभत इति चेत् ॥ ४४ ॥ ४५ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तच्चायुक्तमित्याह—

शक्तिर्मूर्तिस्तस्य हि
सा चैका नाप्ययं मुख्यः ।
बहवः श्रेयोभाजः
पुरुषास्तेषाञ्च शक्तियोत्कर्षः ॥ ४६ ॥

व्यञ्जकभेदोत्कर्षा-
द्दृष्टोतस्तद्भवो मुख्यः ।

यस्माच्छिवस्य निर्मलत्वेन परमार्थत्वेन बैंदवादिदेहायो-गाच्छक्तिरेव देहकार्यं कुर्वाणोपचारेण मूर्तिरुच्यते सा चैकै-वेत्युक्तम् । तस्मादीशानादिस्तद्भेदोपि न वास्तव एवेति योगिनामिव शरीरभेदोप्यस्य न मुख्य एव । ननु पञ्चवक्त्र-स्त्रिपञ्चपदृगित्यादिना शिवस्यापि शरीरभेदः श्रूयते । सत्यम् । सोपि ध्यानार्थमेव श्रूयते । यदुक्तं पौष्करे । 'साधकस्य तु लक्ष्यार्थं तस्य रूपमुदाहृतमिति' अणुपक्षभेदस्तु मुख्य एवेत्याह । 'बहवः श्रेय' इति । अत्र हि भोगभेदाज्जनन-मरणभेदाच्च भोगमोक्षार्थं त्वेते श्रेयोभाजः पुरुषा बहव एव दृश्यन्ते तेषां च व्यञ्जकशरीरेन्द्रियादिसंभवादुत्कर्षः उत्त-रोत्तरं ज्ञानक्रियोत्कर्षश्च दृश्यते तस्मादेषामपि विद्याविद्ये-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

श्वराणां प्रोक्तत्वाच्छिवानुग्रहभेदेन तत्तदधिकारभेदाद्भुवन-भेदाच्च तत्संभवो भेदो वास्तव एव--

ततश्च—

कुरुतेऽर्थं शिवशक्ती
तानधिरुह्येह तद्गताद्भेदात् ॥ ४७ ॥
भिन्ने इव लक्ष्येते
गुणतो जातितश्च तन्नाम ।

यस्मात्तानधिष्ठाय शिवशक्ती पुरुषार्थं साधयतः ततस्त-द्भेदेन तेऽपि भिन्ने इव भवतः स च सशक्तिकः शिवः तद्गतकृत्यभेदयोगेन गौण्या वृत्या तत्तत्संज्ञावान्भवति--

अतः शिव एव सर्वानुग्राहक इत्याह--

नित्यस्वभावविमलः
सर्वज्ञः सर्वकृच्चेशः ॥ ४८ ॥
अविहतशक्तिः शंभुः
सुहृदेकः सर्वपुरुषाणाम् ।
अत्र च शक्तिच्छितयं
बोधध्यानादिसिद्धये गदितम् ॥ ४९ ॥
मूर्तिस्तद्वांश्चेति
लेशादुक्तिश्च शक्तिशक्तिमतोः ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अत्र शास्त्रे भोगमोक्षासिध्यर्थं ज्ञेयतया च सकलनिष्कलाख्यं शक्तिशक्तिमत्संज्ञं वा 'तत्वद्वयमुक्तम् । तयोश्च शक्तिशक्तिमतोर्मूर्तिमूर्तिमत्त्वेनोक्तिर्ज्ञेया । एतदुक्तं भवति अधिकारावस्थायां कार्यभेदादष्टत्रिंशत्कलाभेदभिन्ना शक्तिरेवास्य मूर्तिः । तद्योगादेव चासौ सकलः प्रोच्यते । उपरतव्यापारतया युक्तो निष्कल इति ॥ ४८ ॥

तां च ।

मूर्तिमधिष्ठाय हरः
पुरुषाणां परहितैकदृक्छंभुः ॥ ५० ॥
कुरुते तु भुक्तिमुक्ती-
रुद्धबलत्वात्स्वतोऽसमर्थानाम् ।

ध्येयाकाराभिव्यक्तां शक्तिरूपां मूर्तिमधिष्ठाय परहितैकदर्शी शंभुः मलावृतसामर्थ्यत्वेन स्वभोगमोक्षाय स्वयमसमर्थानां पुंसां भोगमोक्षौ कुरुते । स च पाशान्पशुभ्यो हरति तांश्च भोगार्थं मोक्षार्थं वा हरतीति हरः कथ्यते । यदुक्तं 'हरति पशुभ्यः पाशान्पुंसोऽप्यूर्ध्वं पदं ततस्तु हरः ।' प्रयोगश्चात्र पुरुषा भोगार्थं मोक्षार्थं वा न स्वयं प्रवर्तितुं शक्ताः बद्धत्वेनास्वतंत्रत्वात् मेषादिबद्धपशुवत् । पाशाश्च न

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

पुरुषार्थं स्वयं प्रवर्तन्ते निवर्तन्ते वा जडत्वाद्रवादिवत्। अतो यस्तेषां भोगमोक्षहेतुः सः शिव एव सिद्धः ॥ ५० ॥

अत्र च ।

विद्या विद्येशत्वं
चापरमुक्तिः परेह शिवसमता ॥ ५१ ॥

विद्यादिपदानां परमुक्त्यपेक्षया प्रेर्यत्वेऽपि मायोत्तीर्णत्वान्निर्मलत्वाच्च न पुनः संसारयोग इत्यपरमुक्तित्वं शिवसाम्यं तु परमोक्ष एव ।

ततश्च ।

सर्वव्याप्त्यर्हत्वा-
न्नाभिव्याप्स्यन्ति मन्त्राद्याः ।
पत्या व्यञ्जितशक्तिः
पुरुषोऽतो जायतेऽस्य पतिसमता ॥५२॥
व्यञ्जकमनुकुर्वन्ती
पूर्वं दृष्टा च शक्तिरणोः ।
प्राग्दृष्टत्वाच्छक्ते-
र्नो संक्रान्तिर्न जातिवच्चैका ॥ ५३ ॥

मन्त्रादयः परमुक्त्यर्हत्वान्मुक्तसंज्ञाभाज इत्यर्थः । ननु संसारावस्थायां पुरुषस्य किञ्चिज्ज्ञत्वदर्शनान्मुक्तावपि तादृश

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एवात आह—**पत्या व्यञ्जितेति** । सर्वज्ञेन सर्वसामर्थ्ययुक्तेन च शिवेन यतोऽसौ पुमान्व्यञ्जितशक्तिस्ततोऽस्य तत्साम्यं भवत्येव । तथा हि । संसारावस्थायामभिव्यञ्जकबलानुसारेण केषाञ्चिद्ज्ञानादियोगोऽन्येषां च ज्ञानाद्युत्कर्षो दृश्यते । अत एवेश्वरगुणसंक्रान्तिमोक्षवादोऽप्ययुक्त इत्याह **प्राग्दृष्टत्वादिति** । पुरुषे प्राज्ञ ज्ञानादिशक्तेर्दृष्टत्वादमूर्तस्य गुणसंक्रात्ययोगात्तत्संक्रान्तौ दृष्टान्तादर्शनाच्च संक्रान्तिपक्षोऽयुक्त-एष च संक्रान्त्यादिमोक्षनिरासप्रकारस्तत्रभवता आचार्येण । 'नोदाहरणसद्भावो गुणसंक्रान्तिसाधने । विज्ञानमुपदेशात्तु तादृगन्यत्प्रजायते । दीपान्तरसमुत्पत्तिः प्रदीपादिन्धनान्तरे । अमूर्तस्य च संक्रान्तौ न लोको न परीक्षकाः' इत्यादिभिः कारिकाभिः श्रीमद्रौरववृत्तौ विस्तरेण साधितः । सा च शिवसाम्यरूपा मुक्तिर्न गोत्वादिजातिवदेका । अपि तु भिन्नैव प्रतिपुरुषगता । सादृश्यव्यतिरेकेण जातेरसंभवादित्यपि तत्रैव साधितम् । पुरुषाणां प्रोक्तवदनेकत्वादेकमोक्षे सर्वमोक्षप्रसङ्गाच्च ॥ ५२ ॥ ५३ ॥

परमात्मलयाख्योऽपि मोक्षो न संभवतीत्याह—

असकृत्पृथगुपलब्धाः
पुरुषास्तेनापि न त्वैक्यम् ।

Center for Shaiva Studies, Pondicherry Collection

plic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

न च नाशः पुंशक्त्योः
मुक्तौ यस्मात्तयोरनादित्वम् ॥ ५४ ॥

मुक्ताविति वक्ष्यमाणेनान्वयः मुक्तौ नैयायिकाद्युपगतसंविदभावोऽप्ययुक्तः शक्तिशक्तिमतोश्चिद्रूपतया नित्यत्वेन च साधनादित्याह न च नाश इति ॥ ५४ ॥

अत एवानादित्वेन नित्यत्वात् मोक्षनिमित्तभूतस्य शिवस्य शक्त्यात्मनस्तदैश्वर्यस्य वा नाशो न संभवति ततश्च तन्नाशेन मुक्ते तदैश्वर्योत्पत्तिरिति यत्प्रवाहेश्वरवादिभिरुच्यते तदयुक्तमित्याह ।

नापि च शिवस्य शक्ते
रथवाभावो निमित्तस्य ।

एषाञ्च ।

अपृथक्कृत्य गुणत्वा-
दुपलब्धिः प्रोच्यते विशेषश्च ॥ ५५ ॥

शिवस्य मुक्तात्मनाञ्च समानगुणत्वादपृथगेकरूपैवोपलब्धिः सर्वविषयो ज्ञानादिप्रकाशः प्रोच्यते किं पुनरभ्यः शिवस्य विशेष इत्याह विशेष इति ।

मुक्तेषु शिवाज्ज्ञातं
माहात्म्यमनादिमध्यान्तम् ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तेषु मुक्तात्मसु अनादिमध्यान्तमपि माहात्म्यं सर्वज्ञसर्व-कर्तृत्वात्मकमनादिमलावृतत्वाच्छिवान्निमित्तभूतादाभिव्यक्तम् शिवस्त्वनादिसिद्धसर्वज्ञत्वसर्वकर्तृत्व इत्ययमस्यैषां च विशेषः

इत्थं सकलवरप्रद
आराध्यश्शंभुरेव तत्वविदा ॥ ९६ ॥
तस्मिंस्तुष्टे सिद्धि-
र्मुक्तिश्च परा भवेत्पुंसः ।

तदुक्तमथर्वशिखायाम् । शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येति । अतश्च सर्वानुग्राहकत्वात्सर्वकर्तृत्वाच्च तदागमस्य शैवाख्यस्यैव प्रामाण्यमागमान्तराणां बौद्धादीना-मन्येषां असर्वज्ञप्रणीतत्वेन परस्परविरोधात् यदाहुः । 'सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा । अथोभावपि सर्वज्ञौ मतिभेदः कथं तयोः ।' इति । ननु शैवस्यापि आगमान्तरविरोधादप्रामाण्यं तन्न— विरोधाभावात् । तथा हि । सर्वान्यागमप्राप्यस्थानप्रदर्शनपूर्वं तदनधिगतार्थप्रकाश-कत्वादस्य प्रामाण्यमनिवार्यमेव । यदाहुः अनधिगतार्थगन्तृ प्रमाणमिति । किञ्च । इति वर्णाश्रमाचारान्मनसापि न लङ्घयेदित्यादिभिर्वर्णाश्रमाचाराभ्यनुज्ञानेन वेदाविरोधाद्वेद-वित्परिग्रहणाच्चास्य मतान्तराणामिव न पाषण्डित्वम् । तथा

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पुराणेतिहासादौ श्वेतोपमन्युप्रभृतीनां महर्षीणामत्रानुष्ठानं श्रूयते । महाभारते च । नरनारायणयोरश्वत्थाम्नश्च । आभ्यां लिङ्गेऽर्चिते देवस्त्वयाऽर्चायां युगे युगे । इति सुवर्णाक्षे च विष्णोस्तदाराधनात् । प्रसादश्च । अपि च । नान्यत्प्रियतरो लोके मम कृष्ण भविष्यतीत्यादि । रामायणे च । कार्तवीर्यादिस्मृतिषु च प्रतिष्ठापूर्वको धर्मः । पक्वेष्टकाचितं सम्यग्यः करोति शिवालयमित्यादि । सूत्रे च । मोक्षं विनिर्दिशेदिति च । अथर्वशिरःसु श्वेताश्वतरादिषूपनिषत्सु लिंगार्चनादि श्रूयते । ततो नास्याविगानता । न च विच्छिन्नमूलता न च कैश्चिदेव परिग्रहः । अतस्तद्वाक्यं सर्वप्रमाणाबाधितत्वात्सर्वोत्कृष्टत्वाच्च ग्राह्यमेव । उक्तं च मोक्षकारिकासु । न चान्येन प्रमाणेन संरुद्धस्तस्य गोचरः । श्रोत्रियैरप्यतो ग्राह्यं तत्फलाधिकसाधनमिति ॥

अथ केनेदं प्रकरणं कृतमित्याह--

इत्यवदत्तत्त्वानि तु

सद्यो ज्योतिः सुवृत्तिकृत् ॥ ५७ ॥

॥ इति तत्त्वसंग्रहः समाप्तः ॥

सुवृत्तिः सद्वृत्तिरिति रौरववृत्तेर्नाम तत्कर्त्रेदं निर्मितमित्यर्थः ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

श्रीमत्खेटकनन्दनार्ककिरणैः सद्वृत्तिवाक्यात्मकैर्ध्वस्ताज्ञा-
नतमश्चयेन गुरुणा घोरादिना शंभुना ॥
तत्त्वज्ञानबुभुत्सुभिर्बुधवरैः संप्रार्थितेनादरा-
त्तत्त्वानामतिसंग्रहस्य विवृतिर्लघ्वी स्फुटं निर्मिता ॥

॥ इत्यघोरशिवाचार्यविरचिता तत्त्वसंग्रहटीका ॥

समाप्ता ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

॥ श्रीः ॥

। शिवाभ्यां नमः ॥

॥ तत्वत्रयनिर्णयः ॥

॥ अघोरशिवाचार्यकृतवृत्तिसहितः ॥

सिद्धानि यत्प्रसादादृष्टादृष्टानि वाञ्छितान्यचिरात् ।
नत्वा शिवं विधास्ये तत्त्वत्रयनिर्णये वृत्तिम् ॥

तत्र तावदाचार्यः प्रारिप्सितप्रकरणस्याविघ्नपरिसमाप्त्यर्थं तत्प्रतिपाद्येनार्थेन विशेषयन्परमेश्वरमेव प्रणमति ।

पुंभ्यः फलं विचित्रं
ददाति संवीक्ष्य बंधवैचित्र्यम् ।
स्वमहिम्नाऽनाद्युदयो
ऽनायत्तो नभो नमस्तस्मै ॥ १ ॥

अनादिरुदयः सर्वविषयज्ञानक्रियाप्रकाशो निर्मलत्वेन यस्य सोऽनाद्युदयः तस्याप्यादिमुक्तत्वाभ्युपगमे अनवस्थास्यादिति भावः । अत एव चासौ न कस्यचिदायत्तः स्वतन्त्र इत्यर्थः । एवं विधो यः शक्त्यात्मना स्वेन महिम्ना

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बन्धवैचित्र्यमालोक्यमलावृतत्वेनास्वतन्त्रेभ्यः पुरुषेभ्यो विचित्रं फलं ददाति । तत्र पक्वमलेभ्यस्तत्पाकवैचित्र्यानुगुणं परापरमोक्षं ददाति । अपक्वमलेभ्यस्तत्परिपाकार्थमेव कर्मवैचित्र्यानुगुणं भोगरूपं फलं ददातीत्यनेनास्य सर्वानुग्राहकत्वं सिद्धम् । स च शिव एव तस्यैव सर्वज्ञत्वसर्वकर्तृत्वात्मनाऽनादिसिद्धेन शिवत्वेन योगो यस्तस्मै शिवाय नमो नम इति ॥ १ ॥

इत्थं कृतपरगुरुनमस्कारः प्रकरणकरणं प्रतिजानीते ॥

अथ नतिभाजस्तन्त्रे
संक्षेपात्किंचिदर्थसद्भावम् ।
वक्ष्ये ज्ञातं गुरुतो
हितकृतये मन्दबुद्धीनाम् ॥ २ ॥

अत्र ह्याचार्यः श्रीमद्रौरवसिद्धमर्थसद्भावं तत्त्वसंग्रहेण संक्षेपात् प्रकाश्य श्रीमत्स्वायंभुवसिद्धमनेन प्रकाशयति अत एव तत्समाप्तावुक्तम् । 'इत्यवदत्तत्त्वानि तु सद्यो ज्योतिः सुवृत्तिकृदिति' श्रीमद्रौरववृत्तेरेव सुवृत्तित्वेन सिद्धत्वात् । अत्रापि उपसंहारे वक्ष्यति । 'उक्तः समासतोऽयं तत्त्वत्रयनिर्णयश्च वृत्तिकृता । स्वायंभुवस्येति । नतिर्नमस्कारः सर्वात्मभिः क्रियमाणं भजतीति नतिभागत्र शिव एव

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तस्यैव सर्वेश्वरत्वेन सर्वाराध्यत्वात् । तस्य शिवस्य तन्त्रे शास्त्रे गुरुसंप्रदायादापरमेश्वरमविच्छिन्नात् ज्ञातं मन्दबुद्धीनां हिताय वक्ष्ये इति ॥ २ ॥

शंभुः पुरुषोमाया
नित्यं विभु कर्तृशक्तियुक्तं च ।
सुप्तेपि विकृतिजाते
त्रितयं जागर्ति तत्वानाम् ॥ ३ ॥

अत्र शं सुखमप्रेर्यतारूपं भावयतीति शंभुः शंभुशब्देन समवेतशक्त्यविनाभूतः शिवः कथ्यते । पुरुषशब्देन च जात्येकवचनेन सर्वे आत्मानः मायाशब्देन च तन्त्रोच्चारिते न मायामहामायारूपं शुद्धाशुद्धं जगदुपादानद्वयमुच्यते । यदुक्तं श्रीमद्रौरवे । 'मायोपरि महामायेति' तच्च त्रितयं नित्यं अनादित्वात् तेषामप्यादिमत्वेऽनवस्थाप्रसङ्गात् नित्यत्वेन श्रवणाच्च । किञ्च । विभु । तत्र शंभुपुरुषौ सर्वगतावेव असर्वगतत्वे व्योमादिवदमूर्तत्वेन गमनासंभवाच्छिवस्य सर्वाधिष्ठानमात्मनश्च देशान्तरकर्मफलभोगो नोपपद्यते यतः माया च स्वकार्यव्यापिका । अत्र च मलस्य अनाद्यात्मावारकत्वेनार्थान्नित्यत्वं व्यापित्वं च सिद्धमिति न पृथक्तस्योपदानं तथा कर्तृशक्तियुक्तं च तत्र पतिपुरुषौ चेतनत्वात्

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

जगत्कर्तृत्वेन भोक्तृतया च कर्तृशक्तियुक्तौ कर्तृत्वादेव च ज्ञातृशक्तियुक्तौ । दृक्क्रियात्मकमेव च स्वरूपं चैतन्यस्य । यच्छ्रूयते । 'चैतन्यं दृक्क्रियारूपमिति' माया च कर्तुः परमेश्वरस्य शक्त्याधिष्ठिता ततश्च **तत्वानां** त्रितयं कार्यवर्गे संगृहीतेपि **जागर्ति** प्रकाशत एव ॥ ३ ॥

इत्थमेषां साधर्म्यमुक्त्वा वैधर्म्यमाह—

शिवपुरुषावतिसंख्यौ
प्रसवविहीनौचिता समेतौ च ।
एकं प्रसवित्वयुतं
मायातत्वं चिताविहीनं च ॥ ४ ॥

तत्र आत्मवर्गोऽनन्तत्वादतिसंख्यः शिवोपि अनन्तचिद्‌चिद्वस्त्वधिष्ठानादौपचारिकेण भेदानन्त्येन युक्तत्वादुपचारेणातिसंख्यः । अथवा । मुक्तात्मनामपि मलापनयनादभिव्यक्तेन सर्वविषयेण ज्ञानक्रियात्मना शिवत्वेन योगाच्छिवपदेनोपादानं कृत्वातिसंख्यत्वमुक्तम् । तौ चद्वावविकारित्वात्प्रसवेन परिणामात्मना विहीनौ प्रोक्तवच्चैतन्ययुक्तौ च । मायातत्वं तु शुद्धमशुद्धं वा परमोपादानत्वादेकं अनेकत्वे ह्यचैतन्ये सत्यनेकत्वात् कारणपूर्वकत्वं स्यात् । उपादानत्वादेव च तत् कार्यप्रसवयुक्तं मृदादिवदचेतनं च ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इत्थं शिवात्मनोर्मायातत्त्वाद्वैधर्म्यं प्रदर्श्य अधुना शिवस्यात्मनां च वैधर्म्यं दर्शयितुमाह—

ईशाः प्रवृत्तवीर्या-
स्तत्रैकोऽनादिसिद्धगुणविभवः ।
मुक्तेश्वरवैमल्यं
सर्वार्थे दृक्क्रिये च ततः ॥ ५ ॥

प्रवृत्तवीर्याः सर्वविषयसामर्थ्याः ये ते सर्व एव स्वतन्त्रत्वादीशशब्दवाच्याः । तेषु मध्यादेकः परमशिवोऽनादिसिद्धगुणसंपदित्युक्तम् । ततश्च मुक्तात्मनां पतिसमत्वभाजां ईश्वराणां विद्येश्वरादीनां ततः शिवादेव निमित्तभूता द्वैमल्यं शिवत्वाभिव्यक्तिश्च संपन्ना तत्र विद्येशादयोऽधिकारमलांशयोगाच्छिवनियोगेनाधिकारं कुर्वन्ति मुक्तात्मानस्तु तदप्रेर्यत्वात्तेनैव परानुग्रहनिर्वाहाच्च न प्रवर्तते ॥ ५ ॥

ननु अनादिमुक्तस्य शिवस्यापि सकलनिष्कलादिभेदः ईशानतत्पुरुषादिभेदश्च श्रूयते अत आह—

नति पूर्वः कृतवर्गः
तेन स्वामिन्यनादिसंसिद्धे ।
सकलाकलप्रभेदो
गीतो यश्च क्रियाविषयः ॥ ६ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata ar

कृतवर्गः शुद्धाशुद्धरूपः कार्यवर्गः नति पूर्वः शुद्धाशुद्धोपादानपरिणामपूर्वः उत्पद्यत इति शेषः तेन अनादिसिद्धे तस्मिन्यः सकलादिभेदः यश्च क्रियाविषयः सृष्ट्यादिपञ्चकृत्य विषयः सद्योजातादिभेदः स्वकार्योद्योगादिभेदात् सृष्ट्यादिकार्योपाधिभेदाच्च उपचारेण शास्त्रेषु गीतो न पारमार्थिकः । यच्छ्रूयते । 'अधिकारी च भोगी च लयी स्यादुपचरतः इति । तद्भेदः कृत्यभेदेन न भेदः परमार्थत इति च । ईशः सदाशिवः शान्तः कृत्यभेदाद्विभिद्यते इति । पशुविषयः सकलाकलप्रभेदो वास्तव एव तथाहि बन्धत्रययुक्तः कलादियोगे विज्ञानादिना कर्मक्षयेपि संस्कारवशात् किञ्चित्कालमवास्थितश्चेति द्विविधः सकलः अकलोपि द्विविधः तत्र प्रलयेन कलादेरुपसंहृतत्वान्मलकर्मयुक्तः प्रलयाकलः । विज्ञानयोगादिना कर्मक्षयेण केवलमलमात्रयुक्तो विज्ञानकेवलः मुक्तस्त्वमल एव यदुक्तं श्रीमत्स्वायम्भुवे । अथात्मा विमलो बद्धः पुनर्मुक्तश्च दीक्षया । विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः इति ॥ ६ ॥

अथ बद्धस्वरूपमाह—

शिवगुणवद्गुणजातं
पुंसामपि सर्वसंगतं किञ्च ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

एकेन हि सर्वेषां-
मलेन तदनादिसंरुद्धम् ॥ ७ ॥

शिववज्ज्ञानाक्रियात्मकं व्यापकं स्वरूपमात्मनामप्यस्तीति । उक्तं च श्रीमन्मृगेन्द्रे । चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा । सर्वतश्च यतो मुक्तौ श्रूयते सर्वतो मुखमिति । तच्च व्यञ्जकापेक्षत्वात्सर्वेषामात्मनां स्वरूपम् केनचिदेकेन मलेनानादिकृत्वा संरुद्धमवसीयते । तच्च मलमनादित्वादेकमेव । अनेकत्वे ह्यचेतनत्वात् घटादिवत्कारणान्तरं मृग्यम् । ततश्चात्मनां अनाद्यावरणं न संभवति । तदुक्तं श्रीमत्स्वायम्भुवे । अथानादिमलः पुंसामिति ॥ ८ ॥

तेनानीशा ह्यज्ञा
निर्व्यापारा विना बलव्यक्तिम् ।
न च शक्तास्ते स्वबलं
विमलं सर्वार्थगं स्वतः कर्तुम् । ८ ॥

मलयुक्तत्वाच्च आत्मानः स्वबलव्यक्तिं विना अस्वतन्त्राः अज्ञाः अक्रियाश्च भवन्ति ततः तद्व्यञ्जकं शिवमपेक्षन्त इति भावः । ननु आत्मानो ज्ञानादिना स्वबलव्यक्तिं करिष्यन्ति । तदयुक्तमित्याह । **न च शक्ता इति** । अयमभिप्रायः । मलस्य द्रव्यत्वाच्चक्षुषः पटलस्येव न ज्ञान-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

मात्रान्निवृत्तिः। अपि तु चक्षुर्वैद्यव्यापारेणेवेश्वरव्यापारेण दीक्षाख्येनैवेति। एतच्च विस्तरेणोक्तमस्माभिस्तत्त्वसंग्रहलघुटीकायाम् ॥ ८ ॥

मलसंरोधाद्यदतः
तेषामकृतो हि शिववशीकारः।
पत्युस्त्वेते रोध्या
बध्याः शोध्याश्च बोध्याश्च ॥ ९ ॥

मलावृतत्वात्तेषामनावृतेन शिवेन वशीकारोऽकृतोऽनादिसिद्ध इति यदतोस्मात्कारणात् ते रोधशक्त्या रोध्याः। कर्मभोगार्थं कलादिबंधेन बध्याश्च। रोधश्चात्र पाशसामर्थ्योत्पादनेनात्मनां यथानुगुणभोगभोजनात्मकस्तिरोभावः ततश्च मलपरिपाके सति दीक्षया मलादिपाशापनयनेन शोध्याः तयैव शिवत्वव्यक्त्या प्रबोध्याश्च भवन्ति ॥ ९ ॥

अत्र पराशङ्का—

नित्ये ज्ञानादिबले
मलादिपरिकल्पनं ननु ज्यायः।
सत्यं नान्या दृक्त-
त्तादृग्यस्मात्तदीश्वरे दृष्टम् ॥ १० ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

ननु ज्ञानक्रियाबले नित्ये सिद्धे तदावारकत्वेन मलादिकल्पनं ज्यायो भवति नान्यथा । तस्य तु कादाचित्कत्वदर्शनात् कथमेवं कल्प्यते अत आह । सत्यमिति । यस्मादीश्वरे तत् ज्ञानक्रियात्मकं चैतन्यं तादृक् नित्यं दृष्टं तस्मादात्मस्थमपि तत् चैतन्यत्वान्नान्यादृक् नित्यमेवान्यथा आत्मनां विकारित्वेनाचेतनत्वादनित्यत्वादिदोषप्रसङ्गः स्यात्' इति भावः ॥ १० ॥

किञ्च मलाद्यभावे शरीरादियोगोऽप्यस्य न संभवतीत्याह--

मायाविकारयोगे
कर्मयुतः कारणं मलो भविनाम् ।
मलशक्तयो विभिन्नाः
प्रत्यात्मानं च तद्गुणावारिकाः ॥ ११ ॥

कर्मभोगार्थमेव शरीरादेरिष्टत्वान्निर्मलस्य मुक्तात्मनः तदसंभवाच्च शरीरादियोगो नास्ति तदुक्तं श्रीमत्स्वायम्भुवे । 'तद्भावभाविनो भावाः सर्वे मायात्मकाः पशोरिति ।' तथा 'कर्मतश्च शरीराणि त्रिविधानि शरीरिणामिति ।' ननु एवं चेन्मलस्यैकत्वादेकमोक्षे सर्वमोक्षप्रसङ्गः । अत आह **मलशक्तय** इति । मलस्य प्रत्यात्मनियतानेकशक्तित्वात् एकस्याः पाकेन

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

निवृत्तौ । तदावार्यस्यैव मोक्षो न सर्वस्येति भावः ॥ ११ ॥

एतदेवाह--

विनिवर्तते निरोधा
त्पुंबलतः परिणमन्मलः कालात् ।
परिणतिविशेषयोगा
त्सकदाचित्कस्यचित्कथंचिच्च ॥ १२ ॥

मलो हि परिणमन्पुंबलविषयादावरणान्निवर्तते । स चाचेतनत्वान्नस्वयं निवर्तते । अपि तु ईश्वरस्य व्यापारेणैवेत्युक्तम् । स च परिणामः क्रमविकासस्वभावानां पद्मानामिव अनियतकाल इत्याह । **परिणति विशेष** इति ॥ १२ ॥

अत एव परिणति विशेषयोगान्मलपाकतारतम्येन आत्मनां साधन भेदात्परापरमुक्तिभेद इत्याह--

अत एव पुद्गलानां
परिदृष्टाः साधनादुदयभेदाः ।
कालाद्गुणतश्च तथा
घटतेऽसौ नान्यथेशतो जातु ॥ १३ ॥

मोक्षः सप्तप्रकारोऽयमित्यादि श्रीमतङ्गादिश्रूयमाणः साधनभेदात् भक्तिश्रद्धादिगुणभेदात् कालभेदाच्च जायमा-

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

नोऽसौ मोक्षात्मक उदयभेदो मलपरिणतिविशेषादेव घटते नान्यथा । नचेश्वरात्तदनपेक्षादेष भेदो भवति पक्षपातादिदोषप्रसङ्गात् । न चास्य सर्वानुग्राहकस्य पक्षपातः ॥ १३ ॥

अत एव नैष्ठिकयादिदीक्षाभेदस्याप्युपपत्तिरित्याह—

इत्थं गणनाहीनं
निमित्तमभिवीक्ष्य चेश्वरेणोक्तम् ।
सद्युक्तिमद्विमुक्तौ
नेतरथा साधनानंत्यम् ॥ १४ ॥

एकरूपे मलपरिपाके तन्निवृत्युपायस्तत्फलश्च एकरूपमेव स्यादिति भावः । एष च दीक्षाभेदो मलपरिपाकादिभेदश्चास्माभिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेणोक्तः ॥ १४ ॥

साधनानन्त्यमेव प्रपञ्चयितुमाह—

यस्य यथा यावद्भिः
स श्रेयो रोधकृन्मलः पाशैः ।
तस्य तथा तावद्भि-
र्निहितैर्विजहाति बन्धत्वम् ॥ १५ ॥

यस्य विज्ञानकलादेरात्मनः यावद्भिः पाशैः सह यथा मलरोधं करोति । विज्ञानकलस्य केवल एव अज्ञत्वाक्रिय-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

त्वव्याघातभाक्त्वादिभि: स्वकार्यात्मकै: पाशै: संरोधकृत् तदुक्तं श्रीमत्स्वायंभुवे । 'तत्सद्भाववशोऽज्ञत्वादिति पाशौघ इति' प्रलयाकलस्य तु कर्मभिश्च सकलस्यापि तदनुगुणै: साधारणासाधारणरूपैस्तद्भुवनादिभिश्च रोधं करोति तस्य तावद्भिरात्मना सह निहितै: सद्भिर्बन्धत्वं विजहाति ॥

ततश्च ।

इत्थं रूपाणि यत:
सन्मुक्तेः साधनानि दृश्यन्ते ।
शार्वे शास्त्रे तानि च
नेतरथा युक्तिमन्ति जायन्ते ॥ १६ ॥

इत्थं रूपाणि व्यस्तसमस्तपाशच्छेदकारीणि सकलादिभेदेन साधारनिराधारभेदानि नैष्ठिक्यादिभेदभिन्नानि च दीक्षाख्यानि साधनानि यतश्शास्त्रे श्रूयन्ते ततश्च तानीतरथा मलपरिणतिविशेषात्मककारणभेदाभावे युक्तिमन्ति च न भवन्ति तत: साधनभेदश्श्रुत्यन्यथानुपपत्त्या मोक्षभेदस्तत्कारणमलपरिपाकभेदश्चावश्याभ्युपगन्तव्य: । मलपरिपाकचिह्नानि च शास्त्रेषु श्रूयन्ते । येषां शरीरिणां शक्ति: पतत्यविनिवृत्तये । तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ । भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके विधौ ।

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

इत्यादितस्तच्चिह्नविनिश्चय एव गुरुभिर्दीक्षा कर्तव्या नान्यथेति ॥ १६ ॥

अत्र प्रश्नः ।

परिणामयति मलं कः
कर्मापेक्ष्यैव चित्रकमणुभ्यः ।
बीजाद्ददाति चित्र्यं
निष्कृष्य च यःससाधनं भोगम् ॥ १७ ॥

मलस्य अचेतनत्वात् न स्वतः पाको युज्यत इत्यर्थः । अत्र उत्तरमाह कर्मापेक्ष्यैवेति यः कर्मवैचित्र्यानुगुणं भोगं सुखदुःखात्मकं तत्साधनानि शरीरादीनि बीजान्मायातत्वात् अशुद्धात् निष्कृष्योत्पाद्य ददाति स शिव एव । मलमपि रोधशक्त्या पाचयति तत्र च अशुद्धाध्वनि अनन्तद्वारेणैव अस्य कर्तृत्वं यदुक्तं श्रीमत्किरणे । शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुरिति ॥ १७ ॥

किञ्च ।

यश्च स्वापे बीजं
कुर्वन्नास्ते प्रसूतये योग्यम् ।
विश्वञ्च तत्र निहितं
प्रलये तेनैव विश्रान्त्यै ॥ १८ ॥

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्वापे शिवोऽपि चित्रशक्ति मायां पुनः प्रसवयोग्यां करोति तथाविधांश्चात्मनः पुनर्भोगयोग्यान्विधत्ते ॥ १८ ॥

कर्म च भुक्तयै पुंसां
जाग्रति विश्वेऽपि किञ्चिदीशानः ।
समलं स महाबलदः
कारुण्यान्सर्वदैव विनिवृत्त्यै ॥ १९ ॥

कर्म च पुंसां भोगयोग्यं करोति पाचयतीत्यर्थः । तदुक्तं श्रीमन्मृगेन्द्रे—

'स्वापेऽप्यास्ते बोधयन्बोधयोग्या-
न्रोध्यान्रुन्धन्पाचयन्कर्मिकर्म ।
मायाशक्तीर्व्यक्तियोग्याः प्रकुर्व-
न्पश्यन्सर्वं यद्यथा वस्तुजातम् ।' इति ।
'भोगसाधनमाक्षिप्य कृत्वा कारणसंश्रयम् ।
तच्च सात्मकमाक्रम्य विश्रमायावतिष्ठते ।
भविनां भवखिन्नानां सर्वभूतहितो यतः ।' इति च ।

इत्थं प्रलयेऽपि शिवस्य व्यापारं प्रदर्श्य स्थितिकाले तद्व्यापारमाह—**जाग्रति विश्वेऽपीति** । महान्तं बलं सर्वज्ञ-सर्वकर्तृतारूपमात्मभ्यो ददाति इति महाबलदः स ईशानः

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

विश्वे जाग्रत्यपि सर्वदा करुणायुक्तत्वान्मलसहितं किञ्चित्कर्म पाकेन भोगेन विनिवृत्त्यै योग्यं करोति मलपरिपाकार्थं यत्किञ्चित्पक्वं कर्म स्थितिकाले भोजयतीत्यर्थः ॥ १९ ॥

किञ्च ।

तद्विनिवृत्तेः प्रागपि
तत्सामर्थ्योद्बलनदानकृते ।
पुंबलरोधं कुर्व-
न्दृष्टः स च पाशशक्तिसाहाय्यम् ॥२०॥

मलनिवृत्तेः प्रागपि तस्याचेतनस्य स्वतः पाकस्यासंभवात् तत्सामर्थ्योपोद्बलनार्थं तिरोधानशक्त्या पुरुषबलरोधं पाशशक्तिसाहाय्यं च कुर्वन् परमेश्वरो दृश्यते । ननु आत्मानुग्रहाय प्रवृत्तस्य आत्मतिरोधानेन पाशानुग्रहोऽनुपपन्नः । तत्र मलस्य पाकादेव निवर्तयितुं शक्यत्वात्तत्पाकार्थं मायीयबंधसंबन्धेन भोगभोजनात्मकं तिरोधानं दुःखावहं क्षारादिनेव वैद्यः करोतीति तदप्यनुग्रहार्थमेवेत्यविरोधः । तदुक्तं श्रीमन्मृगेन्द्रे । 'यथा क्षारादिना वैद्यस्तुदन्नपि न रोगिणम् । कोटाविष्टार्थदायित्वाद्दुःखहेतुः प्रतीयते । इति ॥ २० ॥

ततश्च—

दृष्ट्वा च तन्निवृत्त्यै
योग्यं युङ्क्ते नृमुक्तये करणम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

बीजस्येव स्वापे
परिणतिरिष्टामलस्यचितिहाने: ॥२१॥

निवृत्तियोग्यं पक्वं तन्मलं दृष्ट्वा शिवः पशुमोक्षाय दीक्षाख्यं स्वशक्तिरूपं करणं युङ्क्ते प्रयोजयतीत्यर्थः । यद्येवं कर्मभोगस्यैव मलपाकहेतुत्वयाभिधानात् प्रलये मलस्य पाको न स्यादत आह । बीजस्येवेति अचेतनत्वान्मलस्य मायावच्चेतनशिवाधिष्ठानेन तदानीमपि पाकः संभवत्येवेत्युक्तम् ॥ २१ ॥

अत्र पराशंका—

यदि च विनिवृत्तियोग्यं
कुरुते शंभुर्मलं ततः किमिति ।
सर्वात्मसु नो युगप
त्कुर्यादिति चोदयन्वाच्यः ॥ २२ ॥

इत्थं वदन्नेवं प्रत्यनुयोज्य इत्याह । इति चोदयन्निति ।

कथमित्याह—

किमिति न सर्वं युगप-
त्कुरुते भोग्यं स्वकर्म तदहर्वा ।
न समाधिरनेकत्वा-
त्कालान्तरभोग्यताबलीयस्त्वम् ॥ २३ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तदहर्वेति । यदैवागतं तदैवेत्यर्थः । ननु कर्मणामश्वमेध-ब्रह्महत्यादीनां विरुद्धफलत्वात् न एकस्मिन्काले भोगः संभवतीति चेत् । तदेतत्समाधानं न युक्तमित्याह । न समाधिरिति ॥ २३ ॥

कथं न समाधिरित्यत आह--

सर्वविकारोत्पत्तौ
शक्ता शक्तिः सदैव सन्निहिता ।
ईशे बीजे च यतो
भवितृ विभुत्वं च भोक्तृभावश्च ॥

तेनानेकानीशः
कृत्वा बृन्दानि कार्यकरणादेः ।
बीजाद्युगपत्पुरुषं
भोजयति सर्वकर्माणि ॥ २५ ॥

यस्माच्छिवे साधारणासाधारणमायाविकारोत्पत्तौ समर्था शक्तिर्वर्तते मायायाश्च समस्तकर्मफलव्यापकत्वं संसारिणि च व्यापकत्वं भोक्तृत्वञ्च विद्यते । ततो मायातत्त्वाद्युगपदेव अनेकानि शरीरादीन्युत्पाद्य शिवः पुरुषं सर्वकर्माणि भोजयेदिति भवत्पक्षेपि प्रसज्यते ॥ २४ २५ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

पुनरपि पूर्वपक्ष्याशंकते——

नन्वनुमिनुमः क्रमशो
दृष्ट्वा कर्माणि भुज्यमानानि ।
पाचयति तथैव शंभु-
स्तानीति समानमुभयत्र ॥ २६ ॥

क्रमिकस्य भोग्यस्य दर्शनात्क्रमिक एव कर्मपाकः शिवेन पाच्ययोग्यतानुरूपं पद्मादेरिव सवित्रादिना क्रियत इत्यनुमीयते ततो नास्माकं युगपत्कर्मभोजनप्रसङ्गः । एवञ्चेद्-स्माभिरपि क्रमिक एवात्मनां संसारवैराग्यशिवभक्त्यादि-शक्तिपातचिह्नं दृष्ट्वा शक्तिपातहेतुर्मलपाकस्तादृशोनुमीयते ततो न सर्वेषां युगपन्न मलपरिपाक इति वयमपि न पर्यनुयोज्या एव । यदुक्तम् 'यत्र स्यादुभयोर्दोषः परिहारोऽपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविनिश्चये । इत्यभिप्रायेणाह समानमिति ॥ २६ ॥

एतदेव प्रपञ्चयति——

मत्वा कार्यं प्रोक्तं
विनिवृत्तिर्गम्यते मलस्यात्र ।
शक्नोति हि योग्यत्वं
तथैव कर्तुमहेश्वरोपीति ॥ २७ ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

अत्र हि प्रोक्तं कार्यं दीक्षानुष्ठानात्मकं शक्तिपाताविनाभूतं दृष्ट्वा मलस्य विनिवृत्तिर्ज्ञायते ततः क्रमिककार्यदर्शनात् क्रमिकमेव मलपरिपाकं शिवः कुर्यात् न युगपदित्यनुमीयत इत्यर्थः ॥ २७ ॥

इत्थं क्रमिकस्यैव मलपाकादेः स्थितिकाले दर्शनात् संहारसमयेपि पाच्यानुगुण एव मलादेः पाको न युगपत्सर्वेषां पाकोत्पत्तिरिति तादृशयप्रश्नेपि भवता उत्तरमभिधेयं अतः अस्मान्प्रति युगपन्मलपाकपर्यनुयोगो भवतो न युक्तमित्यभिप्रायेण आह--

स्वापे चैवं योनेः
योग्यत्वे कर्मणश्च पृष्टेन ।
भवतोत्तरमभिधेयं
स्थितिसमये समानकालीने ॥ २८ ॥

योनेर्मायाया योग्यत्वं प्रसूतिसामर्थ्योत्पादः कर्मणस्तु फलदानयोग्यत्वं पाक एव शेषं सुगमम् ॥ २८ ॥

कथं उत्तरमभिधेयमित्यत आह—

स्रोतःसु च सर्गादौ
नियमविहीने यथा च यद्वस्तु ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

यावति काले भवति
तद्धि तथा तावदीशेन ॥ २९ ॥
कर्तुं शक्यमितीदं
तुल्यं मोक्षे च तन्निमित्ते च ।

एवमुत्पत्ति नियमविहीने शरीरादिसर्गे तत्स्थितौ संहारे वा दृश्यमाने सति माया स्रोतःसु मध्यात् यद्यद्वस्तु यावति काले येन प्रकारेण समुत्पद्यते तद्वस्तु तावति काले तादृगेव ईश्वरेण कर्तुं शक्यते नान्यथेति भवता मायाकार्योत्पत्तियौगपद्यप्रश्नस्य उत्तरं अभिधेयं एवं कर्मपाकादावपीत्युक्तं एष च परिहारो मोक्षदानयौगपद्यप्रश्ने तद्धेतोर्मलपाकस्य यौगपद्य प्रश्ने वा समान इत्याह । इदं तुल्यमिति अस्य च मलस्य वस्त्वात्मकं रूपमेकत्वादि च विस्तरेण शास्त्रेषु उक्तमित्याह—

अलमुद्दिष्टमशुद्धेः
सद्रूपं निरवशेषेण ।
शास्त्रेष्वेकत्वाद्यं
शक्त्यानन्त्यं विना निवर्त्यं तत् ।
शक्त्य नन्त्यप्रमुखं
सद्युक्तेरशासनोत्थायाः ॥ ३१ ॥

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

यच्छ्रूयते । तदेकं सर्वभूतानामनादिनिबिडं महत् । प्र-
त्यात्मस्थस्वकालांतापायिशक्तिममूहवदित्यादि । तत्र तस्य
स्वरूपं प्रोक्तवत् शक्त्यानंत्यं विना पुरुषेभ्यो न निवर्तयितुं
शक्यं एकमोक्षे सर्वमोक्षप्रसङ्गात् एकस्यापि वा मोक्षा
भावप्रसङ्गाच्चेत्याह । शक्त्यानन्त्यमिति । एतच्चानन्तशक्ति-
त्वादिस्वरूपं मलस्य शास्त्रसिद्धया युक्त्या च साध्यत
इत्याह शक्त्यानन्त्यप्रमुखमिति । उद्दिष्टमिति पूर्वेणैव सं-
बन्धः । आदिशब्देन अनादित्वादि गृह्यते । यच्छ्रूयते ।
तदनादिस्थसर्वाग्रातद्धेतुस्तदतोन्यथा । रुणद्धिमुक्तानेवात्मो-
न्मोक्षयत्नस्ततोमृषा । इत्यादि । एष च मलविचारः अस्मा-
भिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेण दर्शित इति तत एवा-
वधेयः ग्रन्थविस्तरभयात्तु नात्र लिख्यते ॥ ३१ ॥

अथ प्रकरणोपसंहारः—

उक्तः समासतोयं
तत्त्वत्रयनिर्णयश्च वृत्तिकृता ।
स्वायम्भुवस्य जडता-
मपनेतुमनादिकां पुंभ्यः ॥ ३२ ॥

अनादिमलावृतज्ञानक्रियत्वात् नैयायिकादिपरिकल्पितां
जडतां आत्मभ्यो अपनेतुं तेषां अविकारित्वात् तदावारकः

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

अतः सद्भावभाविनी माया तन्निवृत्तिकर्ता शिवश्च अत्र संक्षेपेण प्रतिपाद्यत इति

श्रीमदघोरशिवाह्वयेन गुरुणा श्री जन्यया ख्यातया ।
लोकेपि प्रथितेन कुण्डिनकुलं चोलेष्वलंकुर्वता ।
श्रीसर्वात्मशिवांघ्रिपद्मरजसामाराधकेनामलात्स्फूर्तितत्त्वत्रय-निर्णयस्य विवृतिर्लेशादियं निर्मिता ॥

इत्यघोरशिवाचार्यविरचिता

तत्त्वत्रयवृत्तिः ॥

समाप्ता ॥

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

तत्वप्रकाशिकायाः शुद्धाशुद्धपत्रिका ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	३	पक्ष्ये	वक्ष्ये
२	१५	स्या:	स्या
७	१४	त्वाच्छत्र	त्वाच्छित्र
८	११	खलानां	कलानां
९	३	त्वाद्यत्क्र	त्वाद्यद्यत्क्र
१५	५	क्वां	कां
१६	१४	पामला	पक्वमला
२०	३	त्भ	त्म
२४	९	तत्व	तत्वं
२६	१४	चिंतो	चितो
२६	१५	सिद्धिं	सिद्धं
२८	७	दायनु	तामनु
२९	११	पसार:	प्रसर:
३२	६	चैन्यतस्य	चैतन्य
३४	३	शिवनत्व	शिवत्व

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

४०	११	यामायाती	यायाति
४१	१	पन्नमानं	पन्नमात्मानं
४५	१९	वचनवरो	वचनविरो
४७	७	तद्गुणाना	तद्गुणानां
४८	१	त्वात्क	ताक
५७	३	मत्यौ	यत्यौ

तत्त्वसंग्रहशुद्धाऽशुद्धपात्रिका ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५	१३	तन्मात्रांतस्य	तन्मात्रं तस्य
६	९	षरम	परम
८	१६	मनःस्मि	मनांस्मि
१०	२०	वैकार	वैकारि
११	११	नामिश्रं	नमिश्रं
१२	१८	भोग	भाग
१७	१०	केवलः	केवलाः
२०	१९	दखै	दुःखै
२६	६	प्रयोक्ता	प्रयोक्त्या

Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

१२	१	खलानां	कलानां
४१	१६	क्षिप्ताः व	क्षिप्ताः
४१	१७	दावि	दाविव
४४	६	तद्विक्तं	तदव्यक्तं
४९	३	घलानुः	बलानुसारेण
५०	२	यस्स्यात्	यत्स्यात्
५१	११	असर्वज्ञ	असर्वज्ञ

तत्त्वत्रयनिर्णयस्य शुद्धाऽशुद्धपात्रिका ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२	१६	अवश्याभ्युप	अवश्यमभ्यु
१४	६	कारुण्यान्स	कारुण्यात्स
१५	१३	बन्ध	बन्ध
१६	५	दीक्षारुयं	दीक्षाख्यं

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and

Sivagama Siddhanta
Paripalana Sangam,
DEVAKOTTAI.

Center for Shaiva Studies, Pondicherry Collection

lic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and
Center for Shaiva Studies, Pondicherry Collection

ic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta a

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

Center for Shaiva Studies, Pondicherry Collection